CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Coll

॥ विधानपारिजातः ॥

...रिजातः ।

THE VIDHĀNA-PĀRIJĀTA



EDITED BY

PANDITA TARAPRASANNA VIDYARATNA

Professor, Sanskrit College, Calcutta.

VOL. III. FASC. I.

CALCUTTA:

PRINTED BY S. V. CHATTERJI, SATYA PRESS, 16/1, GHOSE LANE.

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET,

1912.

...ndon, W.

...me

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		
Aitarēya Brāhmana, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc 1-5. Vol. IV. Fasc. 1-8 @ /10/	14	6
Aitareyālochanam, (the preface of the Ditto) by Ācārya S. V. Sāmasrami ...	2	0
*Anu Bhāshya, Fasc. 2-5 @ /10/ each	2	8
Astasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
Atmatattvaviveka, Fasc. I	0	10
Acvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (*Sans and Tibetan*) Vol. I, Fasc. 1-6 ; Vol. II. Fasc. 1-8 @ 1/ each	16	0
Bālam Bhatti, Vol I, Fasc 1-2, Vol II Fasc I @ /10/	1	14
Baudhāyana Srauta Sutra, Fasc. 1-3, Vol II Fasc 1-3 @ /10/ each ...	3	12
Bhātta Dīpikā Vol. I, Fasc. 1-5 Vol II, Fasc. I, @ /10/-	4	6
Bauddhastotrasangraha	2	0
Brhaddēvatā, Fasc. 1-4 @ /10/ each	2	8
Brhaddharma Purāna, Fasc. 1-6 @ /10/ each	3	12
Bodhicāryāvatāra of Cāntidevi, Fasc. 1-5	3	2
Cri Cantinatha Charita, Fasc. 1-3	1	14
Catadusani, Fasc. 1-2	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmana Vols I Fasc 1-7, II Fasc 1-5, III Fasc 1-7, V Fasc 1-4	14	6
Ditto Vol. VI Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/, Vol IX. Fasc. I. ...	3	12
Catasāhasrikā-prajñāpāramitā, Part I, Fasc. 1-12 @ /10/ each ...	7	8
*Caturvarga Chintāmani, (Text) Vols. II, 1-25 ; III. Part I, Fasc. 1-18, Part II, Fasc. 1-10 ; Vol. IV, Fasc. 1-6 @ /10/ each	36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	4
Clokavārtika, (English) Fasc. 1-7 @ 1/4/-	8	12
Crâutá Sutrá of Çānkhāyana, (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4 ; Vol. III, Fasc. 1-4, Vol IV Fasc. I @/10/ each ...	10	0
Cri Bhāshyam, (Text) Fasc. 1-3 @ /10/ each	1	14
Dān Kriyā Kaumundi, Fasc. 1-2	1	4
Gadādhara Paddhati Kālasāra, Vol I. Fasc. 1-7	4	6
Ditto Ācārasāra, Vol II, Fasc. 1-4	3	8
Gobhiliyá Grihyo Sutram, Vol. I, @ /10/ each	3	2
Ditto Vol. II, Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Apendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralāta	1	14
Karmapradipa, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc 1-14 @ /1/4/- each ...	17	8
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāsya-pradīpōdyōta, Vol. I Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol. III. Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, Fasc. I @ 1/4	1	4
Manutīkā Sangraha, (Text) Fasc 1-3 @ /10/ each	1	14
Mārkandeya Purāna, (English) Fasc. 1-9 @ 1/- each	9	0
*Mimāṃsā Darcana, (Text) Fasc. 10-19 @ /10/ each	6	4

ML.

ndon, W.

me

Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each		
Aitarēya Brāhmana, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III,		
Fasc 1-5. Vol. IV. Fasc. 1-8 @ /10/	14	6
Aitarevālochanum, (the preface of the Ditto) by Ācārya S. V. Sāmasrami ...	2	0
*Anu Bhāshya. Fasc. 2-5 @ /10/ each	2	8
Astasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
Atmatattvaviveka. Fasc. I	0	10
Acvavaidyaka. Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (*Sans and Tibetan*) Vol. I, Fasc. 1-6 ; Vol. II. Fasc.		
1-8 @ 1/ each	16	0
Bālam Bhatti. Vol I Fasc 1-2, Vol II Fasc I @ /10/	1	14
Baudhāyana Srauta Sutra, Fasc. 1-3 ; Vol II Fasc I-3 @ /10/ each ...	3	12
Bhātta Dīpikā Vol. I, Fasc. 1-5 Vol II, Fasc. I, @ /10/-	4	6
Bauddhastotrasangraha	2	0
Brhaddēvatā. Fasc. 1-4 @ /10/ each	2	8
Brhaddharma Purāna. Fasc. 1-6 @ /10/ each	3	12
Bodhicāryāvatāra of Cāntidevi, Fasc. 1-5	3	2
Cri Cantinatha Charita, Fasc. 1-3	1	44
Catadusani. Fasc. 1-2	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ...	8	0
Çatapatha Brāhmana Vols. I Fasc 1-7, II Fasc 1-5, III Fasc 1-7, V Fasc 1-4	14	6
Ditto Vol. VI Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/, Vol IX. Fasc. I. ...	3	12
Catasāhasrikā-prajñāpāramitā. Part I. Fasc. 1-12 @ /10/ each ...	7	8
*Caturvarga Chintāmani. (Text) Vols. II. 1-25 ; III. Part I, Fasc. 1-18,		
Part II, Fasc. 1-10 ; Vol. IV. Fasc. 1-6 @ /10/ each	36	14
Ditto Vol. IV, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 8-9 @ /10/	1	4
Clokavārtika, (English) Fasc. 1-7 @ 1/4/-	8	12
Crâutá Sutrá of Çānkhāyan (Text) Vol. I, Fasc. 1-7 ; Vol. II, Fasc.		
1-4 ; Vol. III, Fasc. 1-4, Vol IV Fasc. 1 @ /10/ each ...	10	0
Cri Bhāshyam, (Text) Fasc. 1-3 @ /10/ each	1	14
Dān Kriyā Kaumundi. Fasc. 1-2	1	4
Gadādhara Paddhati Kālasāra, Vol I. Fasc. 1-7...	4	6
Ditto Ācārasāra, Vol II, Fasc. 1-4	3	2
Gobhiliyá Grhyo Sutrum. Vol. I, @ /10/ each	3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Apendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralāta	1	14
Karmapradiqh. Fasc. I	1	4
Kāla Viveka. Fasc. 1,7	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc 1-14 @ /1/4/- each	17	8
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāsya-pradīpōdyōta, Vol. I Fasc. 1-9 & Vol. II, Fasc. 1-12, Vol.		
III. Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, Fasc. I @ 1/4	1	4
Manutīkā Sangraha, (Text) Fasc 1-3 @ /10/ each	1	14
Mārkandeya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
*Mīmāṃsā Darçana, (Text) Fasc. 10-19 @ /10/ each	6	4

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ विधानपारिजातः ॥

॥ अथ चतुर्थः स्तवकः ॥

॥ ॐ नमो गणेशाय ॥

विश्वस्य योनिं विश्वेशं विश्वस्याप्ययकारणम् ।
विश्वरूपमनन्तं मे कुलदेवं नमाम्यहम् ॥
सन्ति दानविधौ ग्रन्थाः प्रणीता बहवः पुरा ।
कोऽप्यस्य महिमा वेद्योऽभिज्ञैर्ज्ञायति सर्वथा ।
न पाण्डित्याभिमानेन नच वित्तस्य लिप्सया ।
निबन्धो रच्यते किन्तु विदुषां परितुष्टये ॥

State Museum Library Lucknow 5088

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदत्र मम चापल्यं क्षम्यतां (क्षन्तव्यं) तद्विचक्षणैः।
गुणग्राह्याः सदा सन्तो बालस्य पितराविव॥
ग्रन्थस्थानि विकीर्णानि नानादानानि कृत्स्नशः।
प्रोच्यन्तेऽत्र मया तानि (सम्यग्) विष्णुप्रीतिमभीप्सता॥
ग्रन्थस्यास्यानुक्रमस्तु प्रोच्यते ज्ञानसिद्धये।
आदौ दानप्रशंसेह तत्स्वरूपनिरूपणम्।
ततश्च दानदोषाणां गुणानां च * निरूपणम्।
दानाङ्गानां तथा दातुरथ पात्रनिरूपणम्।
अपात्रोक्तिरथाऽदेयद्रव्यनिरूपणम्।
ग्राह्यद्रव्यं तथाऽग्राह्यं मदेयं च निरूप्यते।
दानदेशाश्च तत्काला निषिद्धा अपि तत्र ये।
इतिकर्त्तव्यता दाने परिभाषा ततः परम्।
तत्राधिकारी मन्त्रार्थज्ञानादिनियमा अपि।
प्रतिमाद्रव्यमानं च कलशादेश्च लक्षणम्।
दर्भादिलक्षणं चान्य नियमानां निरूपणम्।
अनुक्तौ दक्षिणादाननिर्णयः प्रोच्यते तथा।
द्रव्यमानं धान्यमानं मानं क्षारादिकस्य च।
भूमानमङ्गुलादीनां भेदाः सविनियोगकाः।
प्राच्यादिशः साधनं तु प्रोच्यते वास्तुनिर्णयः।

---

* तद्दोषाणामिति क्वचित् पाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सतोरणपताकादेर्मण्डपस्याथ लक्षणम् ।
कुण्डानां विनियोगोऽथ तन्निर्माणं सविस्तरम् ।
मेखला योनिकुण्डादि लक्षणं योन्यवस्थितिः ।
तुलापुरुषपूर्वाणि महादानानि षोड़श * ।
अथ पर्वतदानानि विन्ध्यादीनां † क्रमेण हि ।
सुवर्णदानानि तथा तथानन्दनिधेर्विधिः ।
ततो भद्रनिधेर्दानं दानं च शतमानकम् ।
हेमदानं रूप्यदान मश्वदानमतःपरम् ।
तिलदानानि दानं च का (श्य) सपात्रस्य कीर्त्यते ।
तिलराशेस्ततोदानं तिलपद्मस्य वै पुनः ।

---

* षोड़शमहादानानि यथा —

आद्यं तु सर्वदानानां तुलापुरुषसंज्ञितम् ।
हिरण्यगर्भदानं च ब्रह्माण्डं तदनन्तरम् ।
कल्पपादपदानं च गोसहस्रं च पञ्चमम् ।
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च ।
हिरण्याश्वरथस्तद्वत् हेमहस्तिरथस्तथा ।
पञ्चलाङ्गलकं तद्वद्धरादानं ततः परम् ।
द्वादशं विश्वचक्रं च ततः कल्पलतात्मकम् ।
सप्तसागरदानं च रत्नधेनुस्तथैव च ।
महाभूतघटस्तद्वत् षोड़शः परिकीर्तितः ।

इति

† धान्यादीनामिति क्वचित् पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुद्रैकादशदानं च दानं च तिलगर्भकम् ।
गजदानं देवताभ्यो गजदानं द्विजाय च ।
दासादानं रथस्यापि शिविकाभूमिवेश्मनाम् ।
मतप्रतिश्रयस्यापि दानमाश्रमकस्य च ।
कन्यादानं च कपिलादशभिर्दानसंयुतम् ।
गोदानं च ततो हेमशृङ्गिणो दानमेव च ।
समानवत्सगोदानं दशवर्णगवां ततः ।
त्रिरात्रगोदानमथो गोदानं दैवतेषु च ।
दानं चोभयतोमुख्या वैतरण्यास्ततः परम् ।
ततोवृषभदानं च गुड़धेन्वादयोदश ।
विद्यादानं च वेदानां साङ्गानामितरस्य च ।
दानं त्रिपुरुषाणां च ग्रहाणां दानमीर्यते ।
दशावतारदानं च द्वादशादित्यदानकम् ।
चन्द्रादित्यप्रतिकृतेः कालाख्यपुरुषस्य च ।
आत्मप्रतिकृतेर्दानमुदकुम्भस्य चैव हि ।
अन्तकप्रतिमायाश्च लोकपालाष्टकस्य च ।
मेषजामहिषीदानं दानं कृष्णाजिनस्य च ।
रष्टि कृष्णाजिनस्योक्त मार्द्रकृष्णाजिनस्य च ।
तिथिवारर्क्षयोग मासर्त्तुपक्षदानकम् ।
दानं संवत्सरस्यापि प्रकीर्णानां च दानकम् ।
जलाशयारामवापी कूपादीनां प्रतिष्ठितिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उच्य (ते) न्ते स्तवके ह्यत्र विदुषां प्रीतये मया ॥

इति दानानुक्रमणिका * ।

अथेदानीं चतुर्थः स्तवकः प्रारभ्यते ।

तत्र प्रकीर्णकानि विधानानि कथ्यन्ते ।

तत्रादौ दानविधानानि । तत्र दानप्रशंसा —

तैत्तिरीयश्रुतौ —

दानेन द्विषन्तो मित्रा भवन्ति दानेन सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्तीति ।

वाजसनेयकेऽपि † —

तदेतत्त्रयं शिक्षेद्दानं दमं दयामिति ।
दानेन भोगी भवति मेधावी वृद्धसेवया ।
अहिंसया च दीर्घायुरिति वेदविदो विदुः ।

---

* एकस्मिन् आसियाटिक् सोसाइटीयादर्शं पुस्तके अन्यस्मिन् संस्कृतकलेजीयादर्शे पुस्तके च दानानुक्रमणिकावर्त्तते तदनुरोधेनेयमुद्धृता ।

† अत्र शतपथश्रुताविति पाठो हेमाद्रौ दृश्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नन्दिपुराणेऽपि —

दानं परं प्रशंसन्ति दानमेव परायणम् ।
दानं बन्धुर्मनुष्याणां दानं कोशोह्यनुत्तमः ।
दानं कामफलोवृक्षोदानं चिन्तामणिर्नृणाम् ।
दानमेव परोह्यर्थोदानं मातापिता तथा ।
न दानेन विना किञ्चित् परमस्ति जगत्त्रये ।
दानेन प्राप्यते स्वर्गः श्रीर्दानेनैव लभ्यते ।
दानेन शत्रून् जयति व्याधिर्दानेन नश्यति ।
दानेन प्राप्यते विद्या दानेन युवतीजनः ।
धर्म्मार्थकाममोक्षाणां दानं तत् परमं स्मृतम् ॥

यमः —

यतीनां तु शमोधर्म्मः स्त्वनाहारोवनौकसाम् ।
दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम् ।

मात्स्येऽपि —

न्यायेनार्ज्जनमर्थानां वर्द्धनं चाभिरक्षणम् ।
सत्पात्रे प्रतिपत्तिश्च धर्म्मशास्त्रेषु पठ्यते ।
अप्यधर्म्मसमायुक्तं पतन्तं नरकेऽशुचौ ।
त्रायते दानमेकं तु पात्रभूते द्विजेऽर्पितम् ।
उक्तसर्वगुणोपेतमुक्तदोषैश्च वर्ज्जितम् ।
कामधुग्धेनुवद्दानं फलत्याश्मेप्सितं फलम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इह कीर्त्तिं वदान्याख्यां स्फीतान् भोगांस्त्रिपिष्टपे ।
दानं श्रद्धां ततोऽपि जन्मनि प्रसवोत्तमे ।
दानमेव परोधर्म्मो दानमेव परं तपः ।
न हि दानात् परतर मिह लोके परत्र च ।
दानेन भोगानाप्नोति दानेनायुश्चविन्दति ।
नरः स्वर्गापवर्गौ च दानेनैव समश्नुते ॥
प्रसवोत्तमे कुलोत्तमे ।

आग्नेयेऽपि —

ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
कुटुम्बं पीड़यित्वापि ब्राह्मणाय महात्मने ।
दातव्यं भिक्षवेऽप्यन्न नात्मनाभूतिमिच्छता ॥

व्यासः —

किं धनेन करिष्यन्ति देहिनो भङ्गुराश्रयाः ।
यदर्थं धनमिच्छन्ति तच्छरीरमशाश्वतम् ।
यदि नाम न धर्म्माय न कामाय न कीर्त्तये ।
यं परित्यज्य गन्तव्यं तद्धनं किं न दीयते ।
अदाता पुरुषस्त्यागी धनं सन्त्यज्य गच्छति ।
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥

मनुः —

दानधर्म्मं निषेवेत नित्यमैष्टिकपौर्त्तिकम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परितुष्टेन भावेन याचमानाय शक्तितः ।
स्वर्गायुर्भूतिकामेन तथा पापापनुत्तये ।
मुमुक्षुणा च दातव्यं ब्राह्मणेभ्यस्तथाऽन्वहम् ।

देवलः —

दुर्लभं भारते वर्षे जन्म तस्मिन् मनुष्यता ।
मानुष्ये ब्राह्मणत्वं च दुर्लभं सुतरां मतम् ।
विप्रत्वे सति दुष्प्रापा विद्यादिगुणयोगिता ।
तत्र न्यायार्जितार्थाप्तिस्तत्र भक्तिर्गरीयसी ।
लब्ध्वैतद् गुणसंयोगं तीर्थं पात्रं च पर्व च ।
दानानि ये प्रयच्छन्ति कृतार्थास्ते नराभुवि ।

अगस्त्यः —

गोभिर्विप्रैश्च वेदैश्चसतीभिः सत्यवादिभिः ।
अलुब्धैर्दानशीलैश्च सप्तभिर्धार्यते जगत् (मही) ।
यैर्नभुक्तं न च हुतम् न तीर्थे मरणं कृतम् ।
हिरण्यमन्नमुदकं ब्राह्मणेभ्यो न चार्पितम् ।
दीना विवसना रुक्षाः कपालाङ्कितपाणयः ।
दृश्यन्ते हि महाराज जायमानाः पुनः पुनः ।

कूर्मपुराणे —

यस्तु द्रव्यार्जनं कृत्वा नार्चयेद्ब्राह्मणान् सुरान् ।
सर्वस्वमपहृत्यैनं राजा राष्ट्रात् प्रवासयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मपुराणे —

दृश्यन्ते दुःखिनः सर्वे प्राणिनः सर्वदा मुने ।
अदत्तदाना जायन्ते परभाग्योपजीविनः ।

व्यासः —

अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत्पुरा ।
तदिदं देहि देहीति विपरीतमुपस्थितम् ।
देहीत्येवं ब्रुवन्नर्थी जनं बोधयतीव सः ।
यदिदं कष्टमर्थित्वं प्रागदानफलं हि तत् ॥

कौर्म्मे —

दानधर्म्मात् परो धर्म्मो भूतानां नेह विद्यते ।
इह लोके परलोके नादत्तमुपतिष्ठते ॥
तस्माद्विप्राय दातव्यं श्रोत्रियाय कुटुम्बिने ।

अथ दानस्वरूपम् ।

अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्द्दिष्टं व्याख्यानं तस्य कथ्यते ।
उदिते शास्त्रनिरूपिते । प्रतिपादनं पात्रं प्रति स्वस्वामि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावापादनपर्यन्तस्त्यागः तच्च चतुर्विधम् ।
नित्यं नैमित्तिकं काम्यं विमलं चेति तद्विदुः ।

एषां लक्षणान्याह —

अहन्यहनि यद्दानं तन्नित्यमिति कथ्यते ।
यत्तु पापापनुत्त्यर्थं दीयते विदुषां करे ।
तन्नैमित्तिकमुद्दिष्टं दानं सद्भिरनुष्ठितम् ।
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत्प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ।
यदीश्वरप्रीणनार्थं दीयते विदुषां करे ।
चेतसा भक्तियुक्तेन तद्दानं विमलं स्मृतम् ।
भगवता तु सात्त्विकादिभेदेन त्रैविध्यमुक्तं दानस्य ।

श्रीमद्भगवद्गीतायाम् —

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ।
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम् ।
अदेशकाले यद्दान मपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ।

मनुः —

येन येन हि भावेन यद् यद्दानं प्रयच्छति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेन तेनैव भावेन तत्तदाप्नोति पूजितः ॥
भावेन सात्त्विकराजसादिना ।

हेमाद्रावपि —

तामसानां फलं भुङ्क्ते तिर्य्यक्त्वे मानवः सदा ।
वर्णसंस्कारभावेन वार्द्धके यदि वा पुनः ।
(बाले) बाल्ये वा दासभावे वा नात्र कार्य्या विचारणा ।
अतोऽन्यथा तु मानुष्ये राजसानां फलं भवेत् ।
सात्विकानां फलं भुङ्क्ते देवत्वे नात्र संशयः ।

मत्स्यपुराणेऽपि —

येषां पूर्वकृतं कर्म्म सात्त्विकं मनुजोत्तम ।
पौरुषेण विना तेषां केषाञ्चिद्दृश्यते फलम् ।
कर्म्मणा प्राप्यते लोके राजसस्य तथा फलम् ।
कृच्छ्रेण कर्म्मणा विद्धि तामसस्य तथाफलम् ।
कायिकं वाचिकं दानं मानसं च त्रिधा मतम् ।
अर्हते यत् सुवर्णादिदानं तत् कायिकं मतम् ।
आर्त्तानामभयं दद्मीत्येतद्वै वाचिकं स्मृतम् ।
विद्यया स्याद् यथायोगि तद्दानं मानसं स्मृतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ दानाङ्गानि ।

हेमाद्रौ —

प्रतिग्रहीता द्रव्यं च कालो देशश्च पावनः ।
श्रद्धा च सात्त्विकी ज्ञेयं दानानामङ्गपञ्चकम् * ।
देश काल उपायेन द्रव्यं श्रद्धासमन्वितम् ।
पात्रे प्रदीयते यत्तत् सकलं धर्म्मलक्षणम् ।
उपाय इतिकर्त्तव्यता ।

तत्रैव —

धर्म्ममर्थं च कामंच व्रीड़ाहर्षभयानि च ।
अधिष्ठानानि दानानां षड़ेतानि प्रचक्षते ।

तानि विवृणोति —

पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम् † ।
केवलं त्यागबुद्ध्या यद्धर्म्मदानं तदुच्यते ।

---

* मुद्रितहेमाद्रौ दानानां षड़ङ्गान्यप्युक्तानि ।
यथा —
दाता प्रतिग्रहीता च श्रद्धा देयं च धर्म्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ।

† प्रयोजनमनपेक्ष्य दृष्टफलाननुसन्धानेन इत्यर्थः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयोजनमपेक्ष्यैव प्रसङ्गाद् यत् प्रदीयते ।
तदर्थदानमित्याहुरैहिकं फलहेतुकम् ।
स्त्रीपानमृगयाक्षाणां प्रसङ्गाद् यत् प्रदीयते ।
अनर्हेषु च रागेण कामदानं तदुच्यते ।
संसदि व्रीड़या स्तुत्याऽचार्य्योऽर्थिभ्यः प्रयाचितः ।
यद्दीयते च तद्दानं व्रीड़ादानमिति स्मृतम् ।
दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षवद् यत् प्रदीयते ।
हर्षदानमिति प्राहुर्दानं तद्धर्म्मचिन्तकाः ।
आक्रोशानर्थहिंसानां प्रतीकाराय यद् भवेत् ।
दीयते तापकर्त्तृभ्यो भयदानं तदुच्यते ।

अथ दातृस्वरूपम् ।

तत्रैव —

अपापरोगी धर्म्मात्मा दित्सुरव्यसनः शुचिः ।
अनिन्द्याजीवकर्म्मा च षड्भिर्दाता प्रशस्यते ।
अपापरोगी राजयक्ष्मादिरोगरहितः ।

मनुरपि —

क्रियावान् श्रद्दधानश्च दाता प्राज्ञोऽनसूयकः ।
धर्म्माधर्म्मविशेषज्ञः सर्वं तरति दुष्कृतम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षसां तु कर्म्मणां यस्य त्रीणि कर्म्माणि जीविका ।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ।

प्रभासखण्डे —

आत्मा पुत्रः पुरोधाश्च भ्राता पत्नी सखापि वा ।
यात्रायां धर्म्मकार्य्येषु जायन्ते प्रतिहस्तकाः ।
एभिः कृतं महादेवि स्वयमेव कृतं भवेत् ॥

अथ पात्रलक्षणम् ।

मदनरत्ने —

ब्राह्मणः प्रतिगृह्णीयाद्वृत्यर्थं साधुतः सदा ।
अश्वमणिमातङ्गतिललोहांश्च वर्ज्जयेत् ॥

याज्ञवल्क्यः —

तपस्तप्त्वाऽसृजद्ब्रह्मा ब्राह्मणान् वेदगुप्तये ।
तृप्त्यर्थं पितृदेवानां धर्म्मसंस्थापनाय च ।
सर्वस्य प्रभवोविप्राः श्रुताध्ययनशालिनः ।
तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः ।

इति

न विद्यया केवलया तपसा वापि पात्रता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते ।
किञ्चिद्वेदमयं पात्रं किञ्चित् पात्रं तपोमयम् ।
असङ्कीर्णं तु यत् पात्रं तत् पात्रं तारयिष्यति ।
असङ्कीर्णं योनिसङ्कररहितम् ।
दत्त्वाद्विजाय शूद्राय नरोयाति शुभां गतिम् ।
विद्यातपःशीलवांश्च स च तारयते नरः ।
शीलं संवसता ज्ञेयं शौचं संव्यवहारतः ।
प्रज्ञा संकथनाज्ज्ञेया त्रिभिः पात्रं परीक्षयेत् ।
क्षमा दया दमो दानं धर्मः सत्यमृतं घृणा ।
विद्या विनय आस्तिक्य मेतद्ब्राह्मणलक्षणम् ।

कौर्म्मे —

स्वाध्यायवन्तोये विप्रा विद्यावन्तोजितेन्द्रियाः ।
सत्यसंयमसंयुक्ता स्तेभ्योदद्याद्विजोत्तम ॥
श्रोत्रियाय कुलीनाय विनीताय तपस्विने ।
व्रतस्थाय दरिद्राय प्रदेयं शक्तिपूर्वकम् ।

श्रोत्रियलक्षणमाह यमः

एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा ।
षट्कर्म्मनिरतोविप्रः श्रोत्रियोनाम धर्म्मवित् ।

इति

भारतेऽपि —

सत्यं दानं क्षमा शीलमानृशंस्यं दया घृणा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दृश्यन्ते यत्र लोकेऽस्मिं स्तं देवा ब्राह्मणं विदुः ।

वशिष्ठः —

स्वाध्यायाढ्यं योनिमन्तं प्रशान्तं
वैतानस्थं पापभीरुं वहुज्ञम् ।
स्त्रीषु चान्तं धार्म्मिकं गोशरण्यं
व्रतैः क्लान्तं तादृशं पात्रमाहुः ॥

योनिमन्तं प्रशस्तकुलोद्भवं, वैतानस्थं अग्निहोत्रादिकर्म्म-परं, गोशरण्यं गोशुश्रूषारतम् ।

देवलः —

मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परः ।
अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः ।
इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणा उत्तरोत्तराः * ।
तेषां पर परः श्रेष्ठोविद्यावृत्तविशेषतः ।

एषां लक्षणानि —

ब्राह्मणानां कुले जातो जातिमात्रोयदा भवेत् ।
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ।

अनुपेत उपनयनरहितः —

मन्त्रस्य वा ब्राह्मणस्य वेत्ता ब्राह्मण उच्यते ।
वेदवेदाङ्गतत्त्वज्ञः क्रियावान् श्रोत्रियो भवेत् ॥

---

* प्रथमं श्रुतौ इति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्ज्जितः ।
श्रद्दधानः क्रियावांश्च अनूचानः स उच्यते ।
स्वाध्यायकर्म्मसम्पन्नः अज्ञावाग्नलसूयकः ।
भ्रूणहत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः ।
वैदिकं लौकिकं चैव सर्वं ज्ञानमवाप्य यः ।
आश्रमस्थोवशी नित्यमृषिकल्पः स उच्यते ।
ऊर्द्ध्वरेतास्तपस्युग्रे नियताशेन संशयी ।
शापानुग्रहयोः शक्तः सत्यसन्धोभवेदृषिः ।
ध्यानस्थोनिष्क्रियोदान्त * स्तुल्यमृत्काञ्चनोमुनिः ।
आश्रमस्थो गृहाश्रमस्थः —
एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रितः ।
त्रिशुक्लानाम विप्रेन्द्राः पूज्यन्ते वसनादिषु ।
सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
अधीते शतसाहस्र मनन्तं वेदपारगे ॥
अधीतः प्रारब्धवेदः —
सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् ।
भोजने चैव दाने च दहत्यासप्तमं कुलम् ।
इदमुभयोः साम्ये । असाम्ये तु
ब्राह्मणातिक्रमो नास्ति विप्रे मन्त्रविवर्ज्जिते ।

---

* ब्रह्मनिष्ठोब्रह्मवेत्ता मुनिरित्यभिधीयते । इति,—ग पुस्तके पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते ।

तथा —

सम्बन्धिनस्तथा सर्वान् दौहित्रं विट्पतिं तथा ।
भागिनेयं विशेषेण तथा बन्धून् हापयेत् ।

विट्पतिर्जामाता —

विष्णुधर्म्मोत्तरे —

आत्मनस्तु भवेत् पात्रं मान्यस्य स्यात् पुरोहितः ।
पुरोहिते तु स्वे दत्तं दानमक्षय्यमुच्यते ।
उपाध्यायर्त्विजोश्चैव गुरावपिच मानवैः ।
वर्णापेक्षा न कर्तव्या मातरं पितरं प्रति ।

तथा —

मातृष्वसा स्वसा चैव तथैवच पितृष्वसा ।
मातामही भागिनेयी भागिनेयस्तथैव च ।
दौहित्रोविट्पतिश्चैव तेषु दत्तं महाफलम् ।

ब्राह्मे —

यत् कन्यासु पिता कुर्य्याद्दानं पूजनमर्चनम् ।
कृतं तत् सुकृतं विद्यात् तद्दत्तं दत्तमक्षयम् ।
पूजनं सत्कारः ।

पद्मपुराणे —

दीनान्ध कृपणानाथवाग्विहीनेषु यत्तथा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विकलेषु तथान्धेषु जड़वामनपङ्गुषु ।
रोगार्त्तेषु च यद्दत्तं तत्स्याद्दशगुणं धनम् ।

तथा —

अनाह्मणास्ते षट् प्रोक्ता ऋषिभिः शौनकादिभिः ।
आद्योराजभृतस्तेषां द्वितीयः क्रयविक्रयी ।
तृतीयो बहुयाज्यः * स्याच्चतुर्थोग्रामयाजकः ।
पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ।
अनाश्रितां तु यः पूर्वां सादित्यां चैव पश्चिमाम् ।
नोपासीत द्विजः सन्ध्यां स षष्ठ इति कीर्त्तितः ।
अयं निषेधोदानविशेषपरः ।

तथा—

मन्त्रपूर्वं च यद्दान ममन्त्राय प्रयच्छति ।
दातुर्निकृत्य हस्तं तद्भोक्तुर्जिह्वां निकृन्तति ॥
दानं दद्यात् प्रयत्नेन श्रद्धापूतमतन्द्रितः ।
अश्रद्धया हुतं दत्तं नच तत् प्रेत्य नो इह ।
यद् यदिष्टं विशिष्टं च न्यायप्राप्तं च यद्भवेत् † ।
तत्तद्गुणवते देयमित्येतद् दानलक्षणम् ।

तथा —

सप्त वित्तागमाधर्म्या दायोलाभः क्रयोजयः ।

---

* बहूनां याज्यायस्य सबहुयाज्यः ।

† अमन्त्रायेत्यत्र अपात्रायेति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च ।

प्रयोगः शास्त्रीयमार्गेण कुसीदं, कर्म्मयोग आर्त्विज्यम् ।

एतानाह गौतमः —

ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य धनं जितम् ।

क्रयश्च विक्रयश्चैव निर्द्दिष्टौ वैश्यशूद्रयोः * ।

यमः —

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते ।

मध्वास्वादो विषं पश्चाद्दातुर्धर्म्मोऽन्यथा भवेत् ।

कुटुम्बं पीड़यित्वापीति तु आवश्यकत्वार्थं वेदितव्यम् ।

तथा —

द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ ।

दाता त्वन्नस्य दुर्भिक्षे सुभिक्षे हेमवस्त्रदः ॥

संश्रुत्य यो न दित्सेत याचितश्च न यच्छति ।

उभावनृतिकावेतौ वृथापापमवा (पतुः) प्नुतः ॥

मनुः —

सान्तानिकं यक्ष्यमाणमध्वगं सर्व्ववेदसम् ।

गुर्व्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः ।

नवैतान् स्नातकान् विद्याद्ब्राह्मणान् धर्म्मभिक्षुकान् ।

---

* निर्विष्टमिति हेमाद्रौ पाठः । निर्विष्टं कृष्यादिना यल्लब्धं निर्वेशो भृतिः भोगयोरिति स्मरणात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निःस्वेभ्योदेयमेतेभ्योदानं विद्या विशेषतः ।
एतेभ्योहि द्विजाग्रेभ्योदेयमन्नं सदक्षिणम् ।
इतरेभ्योवहिर्वेदि कृतान्नं तु विधीयते ।

सान्तानिकः सन्तानप्रयोजनकविवाहवान् तादृशविवाहार्थीति यावत् ।

अध्वगः तीर्थार्थं प्रचलितः । सर्ववेदाः सर्वस्वदक्षिण यागकृत् ।

सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ।

इत्यभिधानात् । गुरुरत्र गोवलीवर्दन्यायेन मातापितृव्यतिरिक्तोज्ञेयः । उपतापी रुग्णः । विद्याविशेषत इति अल्पविद्याय अल्पं बहुविद्याय बहु दातव्यमित्यर्थः ।

दक्षः --

व्यसनापदृणार्थं च कुटुम्बार्थं च याचते ।
एवमन्विष्य दातव्यं सर्वदानेष्वयं विधिः ।
व्यसनं राजचौराद्युपद्रवः । आपद् दुर्भिक्षादिजनिता ।
अत्र आद्योऽर्थशब्दो निवृत्तिवचनः ।

महाभारते --

हृतस्वाहृतदाराश्च येविप्रादेशविप्लु (वाः) वे ।
अर्थार्थमभिगच्छन्ति तेभ्योदत्तं महाफलम् ।

5088

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विष्णुधर्म्मोत्तरेऽपि --

यच्चतश्च * तथादत्तं व्यसनं तर्त्तुमिच्छताम्।
दुःखान्वितानां दीनानां लक्षणं परिचोदितम्।
विवाहमेखलाबन्ध प्रतिष्ठादिषु कर्म्मसु।
आपन्नेषु च यद्दत्तं तदक्षयमुदाहृतम्।

दक्षः —

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
सहस्रगुणमाचार्य्ये त्वनन्तं वेदपारगे।
द्विगुणं साहस्र मनन्तं च यथाक्रमं दाने विशेषः।
समं द्विगुण साहस्र मनन्तं च यथाक्रमम्।
दाने फलविशेषः स्याद्धिंसायामेवमेवहि।

इति दक्षोक्तिः।

भारते —

अध्यापयेत्तु यः शिष्यं कृतोपनयनं द्विजः।
सरहस्यं सकल्पं च वेदं भरतसत्तम।
तमाचार्य्यं महाबाहो प्रवदन्ति मनीषिणः॥

याज्ञवल्क्यः —

सगुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति।
निषेकादीनि कर्म्माणि यः करोति नृपोत्तम।
सम्भावयति चान्नेन सविप्रोगुरुरुच्यते।

* यच्चातश्च इत्यत्र यियक्षतामिति हेमाद्रौ पाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकदेशमुपाध्याय ऋत्विग् यज्ञकृदुच्यते ।

इति

बृहस्पतिः —

शूद्रे (शत) समगुणं दानं वैश्ये तु द्विगुणं मतम् ।
क्षत्रिये त्रिगुणं प्राहुः षड्गुणं ब्राह्मणे स्मृतम् ।
श्रोत्रिये चैव साहस्र माचार्य्ये द्विगुणं मतम् ।
आत्मज्ञे शतसाहस्र मनन्तं चाग्निहोत्रिणि ॥

विष्णुधर्म्मोत्तरे —

अमानुषे समं दानं गोषु ज्ञेयं फलं तथा ।
द्विगुणं च तदेवोक्तं तथा त्रैवर्णसङ्करे ।
शूद्रे चतुर्गुणं प्रोक्तं विशि चाष्टगुणं स्मृतम् ।
क्षत्रिये षोड़शगुणं ब्रह्मबन्धौ तदेव तु ।
द्वात्रिंशद्घ्नं स्मृतं दानं वेदाध्ययनतत्परे ।
शतघ्नं तद्विनिर्द्दिष्टं प्राधीते लक्षसम्मितम् ।
अनन्तं च तदेवोक्तं ब्राह्मणे वेदपारगे ।

इति

एतेषु केषाञ्चिदब्राह्मणादोनामपात्राणामपि पात्रत्वनिरूपणं मन्त्ववद्गवादिदानव्यतिरिक्तदानविषयं वेदितव्यम् ।

यद्वा अन्नदानपरमेतत् —

अन्नदाने न कर्त्तव्यं पात्रापेक्षणमण्वपि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्नं सर्वत्र दातव्यं धर्म्मकामेण सर्वदा ॥
इति विष्णुधर्म्मोत्तरोक्तेः ।

अथ अपात्रनिरूपणम् ।

मनुः --

गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान् ।
प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ।
ये व्यपेताः स्वकर्म्मभ्यः परपिण्डोपजीविनः ।
द्विजत्वमभिकाङ्क्षन्ति तांश्च शूद्रवदाचरेत् ।

वशिष्ठः --

उदक्यान्वासते येषां ये च केचिदनग्नयः ।
कुलं वाऽश्रोत्रियं येषां सर्वे ते शूद्रधर्म्मिणः ।
अन्वासते कर्म्मकाले समीपे एव तिष्ठति ।

महाभारते --

यस्तु प्रेष्यान् द्विजान् मूढ़ो भोजयेद्धव्यकव्ययोः ।
न भवेत्तत् फलं तस्य वैदिकीयं तथा श्रुतिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यमः —

अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।
नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम् ।

भविष्यपुराणे —

नाब्राह्मणाय दातव्यं न देयं ब्राह्मणाक्रिये ।
न ब्राह्मणब्रुवे चैव नच दुर्ब्राह्मणे धनम् ।

व्यासः —

ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः ।
जातिमात्रोपजीवी च भवेद्ब्राह्मणः स तु ।
गर्भाधानादिभिर्युक्त स्तथोपनयनेन च ।
न कर्मविन्नचाधीते स भवेद्ब्राह्मणाक्रियः ।

वराहपुराणे —

अव्रतो वैश्यराजन्यौ शूद्रश्चाब्राह्मणास्त्रयः ।
वेदव्रतविहीनश्च ब्राह्मणो ब्राह्मणब्रुवः ।
यस्य वेदश्च वेदी च विच्छिद्येते त्रिपौरुषम् ।
स वै दुर्ब्राह्मणोनाम यश्चैव वृषलीपतिः ।
न वार्य्यपि प्रयच्छेत नास्तिके हैतुकेऽपिवा ।
स पाषण्डिषु सर्वेषु नावेदविदि धर्म्मवित् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नास्तिकः परलोकवासनाशून्यः। हैतुकः हेतुभिः परलोकं निराकरिष्णुः।

यथा प्लवेनौपलेन निमज्जत्युदके तरन्।
दातृप्रतिग्रहीतारौ तथैवाज्ञौ निमज्जतः।

इति विष्णूक्तेः।

इति सामान्येतिकर्त्तव्यतानिरूपणम्।

अथेदानीं परिभाषा निरूप्यते।

तत्र अधिकारिणोव्यासेनोक्ताः —

वर्णानामाश्रमाणांच चातुर्वर्ण्यं युधिष्ठिर।
दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्कान्दे —

श्रद्धावान् पापभीरुश्च मददम्भविवर्जितः ।
पूर्वनिश्चयमाश्रित्य यथावत् कर्म्मकारकः ।

शूद्रे तु विशेषमाह जातुकर्ण्यः —

अधिकारी भवेच्छूद्रः पूर्त्तधर्म्मे * न वैदिके ।

याज्ञवल्क्यः —

आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ।
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ।
अविदित्वा तु यः कुर्य्याद् याजनाध्ययनं जपम् ।
होममन्तर्जलादीनि तस्य चाल्पं फलं भवेत् ।
यस्तु जानाति तत्त्वेन आर्षं छन्दश्च दैवतम् ।
विनियोगं ब्राह्मणं च मन्त्रार्थं ज्ञानकर्म्म च ।
एकैकस्य ऋषेः सोऽपि वन्द्योऽप्यतिथिवद्भवेत् ।
देवतायाश्च सायुज्यं गच्छत्यत्र न संशयः ।

---

* पुष्करिण्यस्तथा वाप्योदेवतायतनानि च ।
अन्नदानमथारामाः पूर्त्तमित्यभिधीयते ।

तथा —

ग्रहोपरागे यद्दानं सूर्य्य संक्रमणेषु च ।
द्वादश्यादौ तु यद्दानं तदेवत् पूर्त्तमुच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा —

येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै ।
मन्त्रेण तस्य तत् प्रोक्तं मृषिभर्विस्तदार्षकम् ।
छन्दसा छन्दउद्दिष्टं वाससीद्व चाकृते ।
आत्मा संछादितोदेवै मृत्योर्भीतैस्तु वै पुरा ।
आदित्यैर्वसुभीरुद्रैः स्तेन च्छन्दांसि तानि वै ।
यस्य यस्य तु मन्त्रस्य उद्दिष्टा देवता तु या ।
तदाकारं भवेत्तस्य देवत्वं देवतोच्यते ।
पुराकल्पे समुत्पन्ना मन्त्राः कर्मार्थमेव च ।
अनेन चेदं कर्तव्यं विनियोगः सउच्यते ।
नैरुक्तं यच्च मन्त्रस्य विनियोगप्रयोजनम् ।
प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते ।
एवं पञ्चविधं योगं जपकालेह्यनुस्मरेत् ।
होमे चान्तर्जले योगे स्वाध्याये याजने तथा ।

गृह्यपरिशिष्टे —

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म्म प्रकीर्त्तितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् ।
प्रवृत्तमन्यथा कुर्य्याद् यदि मोहात् कथञ्चन ।
यतस्तदन्यथाभूतं ततएव समापयेत् ।

प्रवृत्तमारब्धम् । अन्यथाभूतं क्रमाद्यन्यत्वेन वैपरीत्यमापन्नम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाप्ते यदि जानीयान् मयैतदन्यथा कृतम् ।
तावदेव पुनः कुर्य्यान्नावृत्तिः सर्वकर्म्मणः ।
प्रधानस्याक्रियायां तु साङ्गं तत् क्रियते पुनः ।
तदङ्गस्याक्रियायां तु नावृत्तिः सर्वकर्म्मणः ॥

इति

अदेयान्याह मनुर्याज्ञवल्क्यश्च —

सामान्यं याचितं न्यास आधिर्दाराश्च तद्धनम् ।
अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति ।
आपत्स्वपि न देयानि नव वस्तूनि पण्डितैः ।
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः ।

इति

सामान्यमनेकस्वामिकम् ।

देवलः —

पक्वमन्नं गृहस्थस्य वानप्रस्थस्य गोरसः ।
वृत्तिश्च भैक्ष्यवृत्तीनां न देयं पुण्यमिच्छता ।
दुर्भिक्षे समनुप्राप्ते कुटुम्बे सीदति क्षुधा ।
असाधोरपि गृह्णीयाद्दृणापाकरणार्थकम् ।

वृत्तिर्भिक्षातिरिक्तं वर्त्तनम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ अग्राह्याणि ।

स्कान्दे —

अजिनं मृतशय्यां च मेषीं * चोभयतोमुखीम् ।
कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषोभवेत् ॥

आग्नेये —

हस्त्यश्वरथयानानि मृतशय्यासना (दयः) दि यत् ।
कृष्णाजिनं च गृह्णाति अनापत्स्वपि योद्विजः ।
तथोभयमुखीं घोरां सशैलां मेदिनीं तथा ।
कुरुक्षेत्रे च यद्दानं चाण्डालात् पतितात्तथा ।
मासिकेऽपि मृतश्राद्धे † भुञ्जन् प्रेतत्वमाप्नुयात् ।

तथा —

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्ज्जयेत् ।
प्रतिग्रहेण विप्राणां ब्राह्मं तेजो विनश्यति ॥

---

* मेषीमित्यत्र शङ्खीमिति हेमाद्री पाठः ।
† मृतश्राद्धे इत्यत्र नवश्राद्धे ।

इति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मवैवर्त्ते —

पितृमातृगुरोरर्थे विवाहार्थे च धर्म्मतः ।
अध्वरार्थे च विदुषां ग्रहीतव्यं धनं सदा ।

यमः —

राजधानी यथाशून्या यथा कूपश्च निर्ज्जलः ।
यथा हुतमनग्नौ च तथा दत्तं द्विजेऽनृचे ।

अनृचे वेदज्ञानरहिते ।

यथाकाष्ठमयोहस्ती यथा चर्म्ममयोमृगः ।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ।

व्यासशातातपौ —

नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते ।
रोदित्यन्नं दीयमानं किं मया दुष्कृतं कृतम् ।

सत्पात्रासन्निधाने षट्त्रिंशन्मते —

पात्रं मनसि संचिन्त्य क्रियावन्तं गुणान्वितम् ।
देशे कालेच संप्राप्ते देयमप्सु विनिक्षिपेत् ।

भारतेऽपि —

मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत् ।
दाता तत्फलमाप्नोति प्रतिग्राही न दोषभाक् ।
नामगोत्रे समुच्चार्य्य सम्प्रदानस्य चात्मनः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्प्रदेयं प्रयच्छन्ति कन्यादाने तु पुंत्रयम् ।

अथ दानधर्म्माः ।

ॐकारमुच्चरन् प्राज्ञो द्रविणं सकुशोदकम् ।
गृह्णीयाद्दक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत् ।
कोऽदादितिच मन्त्रेण * सर्वं ग्राह्यं सुबुद्धिना ।

भविष्ये तु —

अदत्तदक्षिणं दानं व्रतं चैव नृपोत्तम ।
विफलं तद्विजानीयाद् भस्मनीव हुतं हविः ।
सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
सर्वेषां चैव दानानां सुवर्णं दक्षिणेष्यते ।
देयद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत् ।
अनुक्तदक्षिणे दाने दशांशं वापि शक्तितः ।
सुवर्णं रजतं ताम्रं तण्डुलाधान्यमेव च ।
नित्यश्राद्धं देवपूजा सर्वमेतदर्दाक्षणम् ।

---

* कोऽदात् कस्मा अदात् कामोऽदात् कामायादात् ।
कामोदाता कामः प्रतिग्रहीता कामैतत्ते । (७ अ ४८ म यजुः ।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नित्यं देयानि राजेन्द्र गावः पृथ्वी सरस्वती ।
दातारं तारयन्त्येते पाठवापनदोहनैः * ॥

इति ।

ब्रह्मवैवर्त्ते —

दानकाले तु देवत्वं प्रतिमादेः प्रकीर्त्तितम् ।
धेनूनामपि धेनुत्वं श्रुत्युक्तं दानयोगतः ।
दातुर्वै दानकाले तु धेनवः परिकीर्त्तिताः ।
विप्रस्य व्ययकाले तु द्रव्यं तदिति निश्चयः ।
दानसम्बन्धिविप्रेण द्रव्यमादाय गच्छता ।
तत् सर्वं विदुषा तेन विक्रेयं स्वेच्छया विभो ।
कुटुम्बभरणं कार्य्यं धर्म्मकार्य्यं च सर्वशः ।

इति ।

अथ मूल्याध्यायो निरूप्यते ।

वराटिकानां दशकद्वयं तु सा काकिनी ताश्च पणश्चतस्रः ।

इत्यादि

* पाठवापनदोहनैरित्यत्र दोहवापनपाठनैरिति ।
एते इत्यत्र च एता इति पाठः सङ्गच्छते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वात्रिंशत् पणिका गावि चतुष्कार्षापणो वर: * ।
वृषे षट् कार्षापणका अष्टावनडुहि स्मृता: ।
दश कार्षापणा धेनावश्वे पञ्चदशैव तु ।
हिरण्ये कार्षापणका: पणा न च तथाधिका: ।
वस्त्रे कार्षापणश्छागेऽष्टौ पणा द्वादशाधिके ।
वृषल्यामथ पञ्चाशन् मूल्यं कार्षापणा: स्मृता: ।
निष्के पञ्चाशदेव स्यात् गजे पञ्चशतानि च ।
पञ्च कार्षापणा: प्रोक्ता दोलायां वडवे तथा ।
गृहेऽष्टौ कार्षापणकास्ताम्रे कार्षापण: स्मृत: ।
ताम्रकर्षेऽपि च पण इत्येषा मूल्यकल्पना † ।
अधिकं कल्पयेन्मूल्यं नोनं वित्तानुसारत: ।

इति

एतत् मूल्यं दक्षिणाविषये आवश्यकदाने मुख्यासम्भवे च ग्राह्यम् ।

अथ गौणोऽयं पक्ष: सति वित्ते न ग्रहणीय ‡ ।
निष्का: पञ्च च दातव्या धेनो: पञ्च पुराणिका: ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशय: ।
निष्कं निष्कार्द्धं पादं वा तदर्द्धार्द्धमथापि वा ।

---

* चतुष्कार्षापणोवर: इत्यत्र वत्स: पौराणिकोमत: इति पाठ: स्मार्त्तसम्मत: ।

† इति मूल्यप्रकल्पना इति मपुस्तके पाठ: ।

‡ ग्रहणीय इति ख पुस्तके पाठ: ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुरीयांशस्तु दातव्यः पञ्च कार्षापणानि वा ।
त्रयः कार्षापणा यद्वा शक्तितो मूल्यकल्पना ।

निष्कोदीनारः —

दीनारस्तु भवेत् कर्षैः शतैः कार्षापणैस्तथा ।
दीनारो रौप्यकैरष्टाविंशत्या परिकीर्त्तितः ।
सुवर्णसप्ततितमो भागो रौप्यक इष्यते ।
जालसूर्य्यमरीचिस्थं त्रसरेणु रजः स्मृतम् ।
तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ।
गौरस्तु ते त्रयः षट् ते यवो मध्यस्तु ते त्रयः ।
कृष्णलः पञ्च ते माष स्ते सुवर्णस्तु षोड़श ।
पलं सुवर्णाश्चत्वारः पलानि धरणं दश ।
द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः ।
ते षोड़श स्याद्धरणं पुराणश्चैव राजतः ।
कार्षापणस्तु विज्ञेय स्ताम्रिकः कार्षिकः पणः ।
धरणानि दश ज्ञेयः शतमानस्तु राजतः ।
चतुःसौवर्णिको निष्कोविज्ञेयस्तु प्रमाणतः ।

इति मूल्याध्यायः ।

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ देयद्रव्यदैवतानि ।

विष्णुधर्म्मोत्तरे —

अभयं सर्वदैवत्यं भूमिर्वै विष्णुदैवता ।
कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः ।
प्राजापत्योगजः प्रोक्तस्तुरगोयमदैवतः ।
तथा चैकशफं सर्वं कथितं यमदैवतम् ।
महिषश्च तथा याम्य उष्ट्रोवै नैर्ऋतो भवेत् ।
रौद्री धेनुर्विनिर्दिष्टा छाग आग्नेय उच्यते ।
मेषं तु वारुणं विद्याद्वराहोवैष्णवः स्मृतः ।
आरण्याः पशवः सर्वे कथिता वायुदैवताः ।
जलाशयानि सर्वाणि वारिधानीं कमण्डलुम् ।
कुम्भंच करकं चैव वारुणानि विनिर्द्दिशेत् ।
समुद्रजानि रत्नानि वारुणानि तथैवच ।
आग्नेयं कनकं प्रोक्तं सर्वलोहानि चाप्यथ ।
प्राजापत्यानि शस्यानि * पक्कान्नमपि च द्विजाः ।
ज्ञेयानि सर्वगन्धानि गान्धर्वाणि विचक्षणैः † ।

---

* शस्यानीत्यत्र सर्वाणीति हेमाद्रौ पाठः ।

† ज्ञेयाश्च सर्वगन्धास्तु गान्धर्वा वै ।—इति हेमाद्रौ पाठः स एव समीचीनः गन्धशब्दस्य नियतपुंलिङ्गत्वात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बार्हस्पत्यं स्मृतं वासः सौम्या ज्ञेयारसास्तथा ।
पक्षिणश्च तथा सर्वे वायव्याः परिकीर्त्तिताः ।
विद्या ब्राह्मी विनिर्द्दिष्टा विद्योपकरणानि च ।
सारस्वतानि ज्ञेयानि पुस्तकादीनि पण्डितैः ।
सर्वेषां शिल्पभाण्डानां * विश्वकर्म्मा तु दैवतम् ।
द्रुमाणामथ पुष्पाणां शाकानां हरितैःसह ।
फलानामपि सर्वेषां तथाज्ञेयोवनस्पतिः ।
मत्स्यमांसे विनिर्द्दिष्टे प्राजापत्ये तथैव च ।
छत्रं कृष्णाजिनं शय्यां रथमासनमेव च ।
उपानहौ तथा यानं † यच्चान्यत् प्राणवर्ज्जितम् ।
उत्तानाङ्गिरसत्वेन ‡ प्रतिगृह्णीत मानवाः ।
शूरोपयोगि यत् सर्वं शस्त्रचर्म्मध्वजादिकम् ।
रणोपकरणं सर्वं कथितं शक्रदैवतम् § ।
गृह्णन्तु सर्वदैवत्यं यत्त्वनुक्तं द्विजोत्तमाः ।
सज् ज्ञेयं विष्णुदैवत्यं सर्वं वा विष्णुदैवतम् ।

---

* शाल्यभाण्डानामिति हेमाद्रौ पाठः ।

† यानमित्यत्र मञ्चमिति ग पुस्तके पाठः ।

‡ तत्तु चाङ्गिरसत्वेन इति हेमाद्रौ पाठः ।

§ सर्वदैवतमिति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ देयप्रतिग्रहस्थलम् ।

प्रतिग्रहमाग्नेयेन प्रतिगृह्णीयात् ।
आग्नेयस्तु देयद्रव्यस्य * मध्यभागः ।
मध्य आग्नेय इति श्रुतेः ।

कात्यायनः —

कुशोपरि निविष्टेन तथा यज्ञोपवीतिना ।
देयं प्रतिग्रहीतव्यमन्यथा विफलं भवेत् ।
ॐकारेण दद्यात् प्रतिगृह्णीयाच्च ।
प्रणवो जगतां बीजं वेदानामादिरेव च ।
एषएव परं ब्रह्म पवित्रमयमुत्तमम् ।
तस्मात् प्रणवमुच्चार्य्य कार्य्यौ दानप्रतिग्रहौ ।
इति स्कन्दपुराणोक्तेः ।

विष्णुधर्म्मोत्तरेऽपि —

भूमेः प्रतिग्रहं कुर्य्याद् भूमिं कृत्वा प्रदक्षिणम् ।
करेगृह्य तथा कन्यां † दासदास्यौ तथा द्विजाः ।

---

* दक्षिणहस्तस्य इति हेमाद्रौ पाठः ।
स एव समीचीनः । अमरेणापि तथैवोक्तेः ।
† करेगृहीत्वा कन्यां तु इति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिग्रहं स्वीकारं —

करं तु हृदि विन्यस्य धर्म्यांश्चेयः प्रतिग्रहः ।
आरुह्य तु गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः ।
तथा चैकशफानां तु सर्वेषामविशेषतः ।
प्रतिगृह्णीत गां पुच्छे शृङ्गे कृष्णाजिनं तथा ।

सामान्येनैकशफानां कर्णे प्रतिग्रह उक्तः, येत्वेकशफाः शृङ्गिण स्तान् विशेषतः शृङ्गे प्रतिगृह्णीतेत्यर्थः ।

आरण्याः * पशवश्चान्ये पुच्छे ग्राह्याविचक्षणैः ।
प्रतिग्रहमथोष्ट्रस्य आरुह्य च तथा भवेत् † ।
वीजानां मुष्टिमादाय रत्नान्यादाय सर्वतः ।
वस्त्रं दशान्तादादद्यात् परिधायाथवा पुनः ।
आरुह्योपानहौ यानमारुह्यैव तु पादुके ।
ईषायां तु रथो ग्राह्यश्छत्रं दण्डे च धारयेत् ।
आयुधानि समादाय तथामुच्य विभूषणम् ।
वर्म्मध्वजौ तथा स्पृष्ट्वा प्रविश्य च तथागृहम् ।
अवतीर्य्य च सर्वाणि जलस्थानानि वै द्विजाः ।
द्रुमांश्च प्रतिगृह्णीयान् मूले न्यस्तकरो द्विजः ।
छत्रं च चामरं मूले फलं संगृह्य गौरवात् ।

---

* आरण्या इत्यत्र कर्णजा इति हेमाद्रौ-पाठः ।

† यानानां चाधिरोहणात् ।

—इति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिशिष्टे —

प्रतिगृह्णीत गां पुच्छे कर्णे वा हस्तिनं करे।
मूर्द्ध्नि दासीमजां चैव पृष्ठेऽश्वतरगर्दभौ।
अश्वं कर्णे भटे वापि अन्तमुद्दिश्य धारयेत्।
शुचिर्वाप्यशुचिर्वापि दद्यादभयदक्षिणाम्।
शुचिनाऽशुचिना वापि ग्राह्या चाभयदक्षिणा।
द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा ब्राह्मणः पठेत्।
कोऽदादित्याद्यमुं मन्त्रं * सर्वदानेष्वयं विधिः।

इति।

अथ दानदेशः।

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।
नवयोजनसाहस्रोविस्तारोऽस्य महामुने।
कर्म्मभूमिरियं स्वर्गमपवर्गमपीच्छताम्।
“सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्।

---

* ३१ पृष्ठे प्रदर्शितम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ।
आ समुद्रात्तु वै पूर्वादा समुद्रात्तु दक्षिणात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं प्रचक्षते ।
कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः ।
एषु दानं महापुण्यं संसारभयनाशनम् ।

अथ दानकालः ।

अयने विषुवे चैव चन्द्रसूर्य्यग्रहे तथा ।
अमायां पूर्णिमायां च संक्रान्तौ हरिवासरे ।
यथाविधि प्रदातव्यं विप्रशाठ्यं विना जनैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ दानप्रकारः ।

तत्रादौ विष्णुरोम् तत्सदद्य इत्याद्युच्चार्य अमुकप्रवराद्यन्वितं भवतस्त्वामहं क्रदानसम्प्रदानत्वेन वृणे इति सङ्कल्प्य पूगीफलं ब्राह्मणहस्ते दत्त्वा उदङ्मुखो यजमानः प्राङ्मुखं ब्राह्मणं गन्धपुष्पवासोभिरभ्यर्च्य देयं चालङ्कृत्य स्वप्रवराद्युच्चारणपूर्वकं ब्राह्मणाय दत्त्वा पूजयित्वा च तदाशिषो गृह्णीयात् ।

ततो दानफलमीश्वराय समर्पयेत् ।

इति दानसामान्यविधिः ।

अथ दशदानद्रव्यपरिमाणम् ।

मदनरत्ने —

तत्र गोमूल्यं सुवर्णं निष्कयो (रूप्ययो) र्निष्कं तुल्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदर्द्धं तदर्द्धं वा गौणम् ।

भूपरिमाणं तु उत्तमपक्षे गोचर्म्ममात्रम् ।

तल्लक्षणं तत्रैव —

दशहस्तेन दण्डेन त्रिंशद्दण्डानिवर्त्तनम् * ।
दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते ।

इत्युक्तम् ।

मध्यमपक्षे, दशहस्ताः समन्ततः ।
अधमपक्षे पञ्चहस्ताः समन्ततः ।

इति

एतद्दक्षिणा निष्कसुवर्णम् ।

तिलदानं तिलराशिदानं । राशिपरिमाणं च पुरुषपरिमितम् । द्रोणमात्रं वा । द्रोणपरिमाणं च ।

पलं च कुड़वः प्रस्थ आढ़को द्रोण एवच ।
धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः ।

इति

---

* मत्स्यपुराणे तु अन्यथोक्तम् —
दण्डेन सप्तहस्तेन त्रिंशद्दण्डानिवर्त्तनम् ।
त्रिभागहीनं गोचर्म्म मानमाह प्रजापतिः ।

इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पलपरिमाणं च —

मुष्टिरेकपलं स्मृतम् ।

इति माहार्णवनिबन्धानुसारेण ज्ञेयम् ।

तथाच षट्पञ्चाशदधिकशतद्वयं मुष्टयोद्रोण इति ।

यद्वा —

पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तिताः ।

इति मते षोड़श सेरा अष्टादश सेरा वा तिलाभवन्ति ।

तिलदानं तिलपात्रदानमितिकेचित् ।

पात्रमानं च षोड़श पलानि । एतद्दक्षिणा माषचतुष्टयमितं सुवर्णम् । हिरण्यप्रमाणमेकस्तोलः । तावत्येव दक्षिणा । अथवा रजतं दक्षिणा ।

हिरण्ये दीयमाने तु रजतं दक्षिणेष्यते ।
अन्यस्मिन् दीयमाने तु रजतं * दक्षिणेष्यते ।
इति स्मृतेः ।

आज्यमुत्तमपक्षे षष्टिपलानि । मध्यमे चत्वारिंशत् । अधमे द्वादश । दक्षिणा सुवर्णमाषे ।
लवणमपि आज्यवत् । गुड़स्तद्द्विगुणो ज्ञेयः ।

---

* रजतमित्यत्र सुवर्णमिति पाठो बहुषु निबन्धेषु दृश्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणा पूर्ववत् । धान्यं द्रोणपरिमितम् । दक्षिणा यथाशक्ति ।

सूक्ष्ममष्टहस्तमात्रं वस्त्रम् । दक्षिणा पूर्ववत् ।

रूप्यमानं चत्वारस्तोलकाः । एकस्तोलकोदक्षिणा ।

इति देयद्रव्यविशेषपरिमाणम् ।

हेमाद्रौ मत्स्यपुराणे —

शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै ।
अष्टौ तु जापकाः कार्य्या ब्राह्मणा वेदपारगाः ।
हेमालङ्कारिणः कार्य्या द्विजा वै पञ्चविंशतिः ।

अष्टौ ऋत्विजः, अष्टौ द्वारपालाः, अष्टौ जापकाः एको-गुरुरित्येवं पञ्चविंशतिर्वरणीयाः ।

अथ तुलापुरुषदानप्रयोगः ।

तत्र तुलापुरुषदानं करिष्यन्नादौ साङ्गं प्रायश्चित्तं कृत्वा कृतस्नानः परिहितात्दतवासा दर्भपाणिः प्रसन्नमनाः कुशोपहितपीठोपविष्ट आचम्य प्राणानायम्य देशकालादि सङ्कीर्त्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अमुककामः पापक्षयकामः श्रीलक्ष्मीनारायणप्रीतिकामोवा श्वोवाऽद्याऽमुकप्रवरोऽमुकगोत्रोऽमुकपुत्रोऽमुकशर्म्माहममुक-तुला-पुरुषमहादानं करिष्ये इति (सङ्कल्प्य) प्रारिप्सितस्य कर्म्मणो निर्विघ्नेन परिसमाप्त्यर्थं गणेशपूजनं पुण्याहवाचनं मातृका-पूजनं नान्दीश्राद्धं गोविन्दोमापतिविनायकपूजनमाचार्य्यादिवरणं मण्डपप्रतिष्ठादीनि च करिष्ये इति च सङ्कल्प्य गणेशपूजनादि नान्दीश्राद्धान्तं कृत्वा (ततो) गोविन्दमुमापतिं विनायकं च व्याहृतिभिस्तत्तल्लिङ्गकमन्त्रैर्वा आवाहनादिषोड़शोपचारैः सम्पूज्य त्रिप्रभृतिब्राह्मणान् पूजयित्वा च अमुककामः श्वोवा अद्य करिष्यमाणेऽमुकतुलापुरुषमहादाने भवन्तो मामनुजानन्तु इति बद्धाञ्जलिः सविनयस्तान् विज्ञापयेत्।

ते च ॐ कुर्वन्त्विति * सहर्षं ब्रूयुः।

ततो यथोक्तं गुर्वादिवरणं कृत्वा तांश्च संपूज्य यथाविधि गुर्वादिकर्म्म कुर्वन्तु इति बद्धाञ्जलिस्तान् प्रार्थयेत्। ततस्ते यथाज्ञानं करवामेति प्रतिब्रूयुः। तत आचार्य्य ऋत्विग्भिः सह मण्डपप्रतिष्ठां कृत्वा महावेद्यां षोड़शारं सर्वतोभद्रं वा विलिख्य पुष्पैरवाकिरेत्। ततस्तदुपरि चित्रं वितानं

---

* कुर्वन्त्वित्यत्र करोत्विति पाठः समीचीनतया प्रतिभाति विज्ञापकस्य यजमानस्य एकत्वेन क्रियाया बहुवचनान्तत्वानुपपत्तेः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वध्नीयात् । तत ईशानकोणस्थितग्रहवेद्यां सर्वतोभद्रमण्डलं विरचय्य तदुपरि फलपुष्पादिसहितं चित्रं वितानं वध्नीयात् ।

ततोमहावेद्याश्चतुर्दिक्षु पूर्वस्यामेव वा कुण्डचतुष्टये वा स्थण्डिलचतुष्टये वा कुण्डे वा स्थण्डिले वा अग्निं प्रणीय ग्रहवेद्यां सर्वतोभद्रदेवताः सम्पूज्य नवग्रहमयोक्तविधिना नव-ग्रहान् नव अधिदेवता नव प्रत्यधिदेवता गणपत्यादिपञ्चक मिन्द्रादिदशलोकपालांश्चावाह्य ।

धवोऽध्वरस्तथासोम आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ।

इत्यष्टवसूनिन्द्रेशानयोर्मध्ये स्थापयेत् ।

धाताऽर्य्यमा च मित्रश्च वरुणोऽंशो भगस्तथा ।
इन्द्रो विवस्वान् पूषाच पर्जन्योदशमः स्मृतः ।
ततस्त्वष्टा ततोविष्णु रजघन्यो जघन्यजः ।

इति द्वादशादित्यानिन्द्राग्निमध्ये आवाहयेत् ।

वीरभद्रश्च शम्भुश्च रुद्रा एकादश स्मृताः ।

इत्येकादश रुद्रानग्नियममध्ये आवाहयेत् ।

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरोलोकमातरः ।
धृतिः पुष्टिस्तथा तुष्टि रात्मनः कुलदेवता ।

इति षोड़श मातृ र्यमनिर्ऋतिमध्ये आवहायेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुनर्गणपतिं तन्मन्त्रेण नाममन्त्रेण वा निर्ऋतिवरुणमध्ये आवाहयेत् ।

आवहः प्रवहश्चैव उद्वहः संवहस्तथा ।
परावहश्च विवहस्तथा परिवहोऽनिलाः ।

इति सप्त मरुतो वरुणवायुमध्ये आवाहयेत् ।

ततोब्रह्माणं विष्णुं रुद्रं अर्कं वनस्पतिं चेति पञ्चदेवता स्तत्तन्मन्त्रैर्वायुसोममध्ये स्थापयेत् ।

एवं द्वात्रं शतं देवान् प्रतिष्ठामन्त्रेण प्रतिष्ठाप्य अन्वाधानं कुर्य्यात् ।

तत्र प्रजापतिमिन्द्रमग्निं सोमं आज्येनात्र यथा प्रधानं नवग्रहान् नव अधिदेवान् नवप्रत्यधिदेवान् विनायकादिपञ्चक मिन्द्रादिदशलोकपालान् अष्ट वसून् द्वादशादित्यान् एकादशरुद्रान् सप्तमरुतो ब्रह्मविष्णुरुद्रार्कवनस्पतीन् अष्टोत्तरशतसंख्याभिर्द्वादशसंख्याभिर्वा समिच्चरुतिलाज्यादि यथासम्भवद्रव्येण शेषेण स्विष्टकृतमित्याद्युक्ता एता अङ्गप्रधानदेवताः साङ्गोपाङ्गेन कर्म्मणा सद्योयक्ष्य इति यजमानान्वारब्ध आचार्य्योयजमानएव वा अन्वाधाय ब्रह्मोपवेशनाद्याघाराज्यभागान्ते तत्तद्द्रव्येण यथोक्तसंख्यया सूर्य्यादिपञ्चाशीतिदेवेभ्यस्तत्तन्मन्त्रै ऋत्विज श्चतुःशाखिनः स्वगृह्योक्तविधिना जुहुयुः ।

ततोवस्वादित्यरुद्रगौरी मरुतां मन्त्रानुरोधेन समुदाया-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पत्रानामेकएव होमः कार्य्यः । पृथङ् मन्त्राभावात् ।
ते च मन्त्राः —

वसोः पवित्रम् ॥ * ॥

नमस्ते रुद्र ॥ † ॥

श्रीश्च ते ॥ ‡ ॥

मरुतो यस्य ॥ § ॥

एतैर्मन्त्रैः अथवा प्रणवादिचतुर्थ्यन्तैः स्वाहान्तं ध्रुवाय अध्वराय इत्यादिभिर्जुहुयुः ॥

होमे क्रियमाणे द्वारजापकाः स्वस्वशाखोक्तां शान्तिं पठेयुः । तत्तद्दैवतान्यपि सूक्तानि पठेयुः ।

ततोऽग्निग्रहादिपूजा स्विष्टकृन्नवाहुतयश्च ।

तत इन्द्रादिभ्यो बलिदानं कुर्य्यादेतैर्मन्त्रैराचार्य्यः ।

---

* वसोःपवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनोधर्म्मोऽसि विश्वधा असि । परमेण धाम्ना दृंहस्व मह्वार्म्माते यज्ञपतिर्ह्वार्षीत् ॥

अ १ म २ यजुः ।

† नमस्ते रुद्र मन्यव उतोत इषवे नमः । बाहुभ्यामुत ते नमः ॥

अ १६ म १ यजुः ।

‡ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं म इषाण सर्व्वलोकं मइषाण ॥

अ ३१ म २२ यजुः ।

§ मरुतो यस्यहि क्षये पाथादिवोविमहसः । स सुगोपातमो जनः ॥

अ ८ म ३१ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ते च मन्त्रा यथा —

एह्येहि सर्वामरसिद्ध (संघै) साध्यै —
रभिष्टुतो वज्रधरामरेश ।
संवीज्यमानोऽप्सरसांगणेन
रक्षाध्वरं नो भगवन्नमस्ते ॥

ॐ इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं (सदीप) बलिं समर्पयामि ।

एह्येहि सर्वामरहव्यवाह
मुनिप्रवीरै * रभितोऽभिजुष्ट ।
तेजोवता लोकगणेन सार्द्धं
ममाध्वरं पाहि कवे नमस्ते ॥

अग्नये साङ्गायेत्यादि पूर्ववत् ।

एह्येहि वैवस्वत धर्म्मराज
सर्वामरैरर्चित धर्म्ममूर्त्ते ।
शुभाशुभानन्दशुचामधीश
शिवाय नः पाहि मखं नमस्ते ॥

यमायेत्यादि पूर्ववत् ।

एह्येहि रक्षोगणनायक त्वं
विशाल–वेताल–पिशाचसंघैः ।

---

* प्रवीरैरित्यत्र प्रवर्य्यैरिति पद्धतौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मखाध्वरं पाहि पिशाचनाथ *
लोकेश्वरस्त्वं भगवन्नमस्ते ॥

निर्ऋतये इत्यादि पूर्ववत् ।

एह्येहि यादोगणवारिधीनां
गणेन पर्जन्यमहाप्सरोभिः ।
विद्याधरेन्द्रामरगीयमान
पाहि त्वमस्मान् भगवन्नमस्ते ॥

वरुणायेत्यादि पूर्ववत् ।

एह्येहि यज्ञे मम रक्षणाय
मृगाधिरूढः सह सिद्धसंघैः ।
प्राणाधिपः कालकवेः सहाय
गृहाण पूजां भगवन्नमस्ते ॥

वायवे इत्यादि पूर्ववत् ।

एह्येहि यज्ञेश्वर यज्ञरक्षां
विधत्स्व नक्षत्रगणेन सार्द्धम् ।
सर्वौषधीभिः पितृभिः सहैव
गृहाण पूजां भगवन्नमस्ते ॥

ॐ सोमायेत्यादि पूर्ववत् ।

एह्येहि विश्वेश्वर नस्त्रिशूल —

---

* शुभाधिनाथ इति तुलापुरुषदानपद्धतौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कपालखट्वाङ्गधरेण सार्द्धम् ।
लोकेश भूतेश्वर यज्ञसिद्ध्यै
गृहाण पूजां भगवन्नमस्ते ॥

ॐ ईशानायेत्यादि पूर्ववत् ।

निर्ऋतिवरुणयोर्मध्ये

एह्येहि पातालधरा धरे(न्द्र) श्च
नागाङ्गनाकिन्नरगीयमान ।
यक्षोरगेन्द्रामरसिद्धसंघै
रनन्त रक्षाध्वरमस्मदीयम् ॥

ॐ अनन्तायेत्यादि पूर्ववत् ।

इन्द्रेशानयोर्मध्ये

एह्येहि सर्वाधिप देववर्य्य
लोकेश सार्द्धं पितृदेवताभिः ।
सर्वस्य धातास्यमितप्रभावो
विशाध्वरं नः सततं शिवाय ।

ॐ ब्रह्मणे इत्यादि पूर्ववत् ।

ततः पूर्वस्यां दिशि उपलिप्य कुशानास्तीर्य्य च बद्धाञ्जलिः

त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ।
ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि मे ॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऋषयोमनवोगावो देवमातर एव च ।
एते ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः ।
ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह ।
रक्षन्तु मण्डपं सर्वे घ्नन्तु रक्षांसि सर्वतः ।

एतानावाह्य त्रैलोक्यस्थेभ्यः स्थावरेभ्यो (जङ्गमेभ्यश्च) भूतेभ्यो वलिं समर्पयामि इत्येवं प्रयोगेण देवमात्रन्तं सार्वभौतिकं वलिं दत्त्वा आचम्य भूमिं स्पृशेत् ।

तत्र मन्त्रः —

भूमिर्भूमिमगान्माता मातरमप्यगात् ।
ततो यथोक्तप्रकारेण तोरणस्पर्शनं द्वारपूजनं च कृत्वा वलींश्च दत्त्वा मण्डपस्तम्भेषु सर्वेभ्यो देवेभ्यो नमः ।
वंशेषु किन्नरेभ्योनमः । पृष्ठे पन्नगेभ्योनमः ।

इति स्तम्भपूजनम् ।

ततो ध्वजपूजनम् ।

कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्वनेत्रः सुमुखः सुप्रतिष्ठितः ।
ब्रह्मा नागश्च पूर्वादि दशैते ध्वजनायकाः ॥

ततश्चैवं प्रयोगः । कुमुदसहिताय पूर्वध्वजाय नमो गन्धं समर्पयामि इति पञ्चोपचारैः पूजयेत् । कुमुदाक्षसहिताय आग्नेयध्वजाय नमोगन्धं समर्पयामि । पुण्डरीकसहिताय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दक्षिणध्वजाय नमोगन्धं समर्पयामि । वामनसहिताय नैर्ऋत-ध्वजाय नमोगन्धं समर्पयामि । शङ्कुकर्णसहिताय पश्चिम-ध्वजाय नमोगन्धं समर्पयामि । सर्वनेत्रसहिताय वायव्य-ध्वजाय नमोगन्धं समर्पयामि । सुमुखसहिताय उत्तरध्वजाय नमोगन्धं समर्पयामि । सुप्रतिष्ठितसहिताय ईशान्यध्वजाय नमो गन्धं समर्पयामि । ब्रह्मसहिताय ऊर्द्धदिग्ध्वजाय नमो-गन्धं समर्पयामि । नागसहिताय अधोदिग्ध्वजाय नमोगन्धं समर्पयामि ।

ततः साचार्यऋत्विक् आचान्तोयजमानो अध्यवेद्यामुप-विश्य मण्डपोपरि यथोक्तलक्षणं तुलादण्डं दक्षिणोत्तरायतं स्थापयित्वा दक्षिणप्रान्तबन्धादारभ्य तत्तदधिष्ठितदेवताः पूजयेत् । ताश्च यथा —

ईशः शशी मारुतरुद्रसूर्य्याः
स्याद्विश्वकर्म्मा गुरुरङ्गिरोऽग्नी ।
प्रजापतिर्विश्वजगद्विधाता
पर्जन्यशम्भू पितृदेवता च ॥
सौम्यश्च धर्म्मोऽमरराज अश्वि —
जलेशमित्रावरुणौ मरुद्गणः ।
धनेश-गन्धर्व-जलेश-विष्णु
रेताश्चतुर्विंशतिरेव देवताः ।
स्यात् पञ्चविंशः पुरुषपुराणो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यस्तोल्यमानस्तुलया मङ्गत्या ॥

अत्र अङ्गिरोऽग्न्योः पर्जन्यशम्भोर्मित्रावरुणयोश्च मिलितयोरेव देवतात्वम् । एतासां लक्षणानि आकरे ज्ञेयानि ।

गोविन्दप्रतिमा तुलामध्ये मौक्तिकस्रजा सुवर्णशृङ्खलया वा द्वादशाङ्गुलया अवलम्बनीया । यथा तुलास्थितः कर्त्ता तन्मुखं पश्यति । अतएव गोविन्दप्रतिमा स्थूला कार्य्या । हस्तधारणार्थं सूर्य्य-धर्म्मराज-प्रतिमाद्वयं कार्य्यम् । नेति केचित् ।

एता देवतास्तासु तासु प्रतिमासु आवाह्य अग्न्युत्तारणं कृत्वा प्रतिष्ठाप्य नाममन्त्रैः सम्पूज्य तुलादण्डस्य चतुर्विंशति-धातुबन्धे यथागाढ़ं पौराणैर्वैदिकैश्च मन्त्रैः स्थापयेत् ।

ते च मन्त्राः —

पञ्चवक्त्र वृषारूढ़ प्रतिवक्त्रं त्रिलोचन ।
कपालशूलखट्वाङ्गिन् चन्द्रमौले सदाशिव ।
आगच्छ भगवन्नीश तुलाबन्धमलङ्कुरु ।

तमीशानमिति * ।

ॐ भूर्भवः स्वः ईशानं स्थापयामि ।
अत्रिपुत्र जगत्प्राण यमुनाविषयोद्भव ।

---

* तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् । पूषा नो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥

अ २५ म १८ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दशाश्ववाहन श्वेत गदापाणे वरप्रद ।
आगच्छ भगवंश्चन्द्र तुलाबन्धमलङ्कुरु ।

सोमोधेनुम् * ।

ॐ भूर्भुवः स्वः सोमं स्थापयामि ।
मृगारूढ़ महाबाहो मारुत त्वं सदागते ।
ध्वजहस्त महाकाय प्राणरूप महाबल ।
आगच्छ भगवन् वायो तुलाबन्धमलङ्कुरु ।

वायो ये ते † ॐ भूर्भुवः स्वः वायुं स्थापयामि ।

वृषारूढ़ महादिव्य व्यक्ताव्यक्तस्वरूपधृक् ।
नागहार महाकाय सृष्टिसंहारकारक ।
आगच्छ भगवन्रुद्र तुलाबन्धमलङ्कुरु ‡ ।

इमा रुद्राय § ।

---

* सोमोधेनुं सोमोअर्वन्तमाशुं सोमोवीरं कर्मण्यं ददाति । सादन्यं विदथ्यं सभेयम् पितृश्रवणं योददाशदस्मै ॥

अ ३८ म२१ यजुः ।

† वायो ये ते सहस्रिणो रथासस्तेभिरागहि ।
नियुत्वान्त् सोमपीतये ।

‡ आगच्छ भगवन्नर्क यज्ञेऽस्मिन् सन्निधिं कुरु ।
इति तुलादानपद्धतौ पाठः ।

§ इमारुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः । यथाशमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेअस्मिन्ननातुरम् ॥

अ १६ म ४८ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ भूर्भुवः स्वः रुद्रं स्थापयामि ।
पद्मासनं पद्महस्त सिन्दूरारुणसप्रभ ।
रथारूढ़ महाबाहो काश्यपेय महाद्युते ।
आगच्छ भगवन् सूर्य्य तुलाबन्धमलङ्कुरु ।

वट् सूर्य्य * —

ॐ भूर्भुवः स्वरादित्यं स्थापयामि ।
दंशपाणि महावीर सुचित्रकर्म्मकारक ।
विश्वकृद्विश्वधृक् च त्वं रथनामानदण्डधृक् ।
विश्वकर्म्मन्निहागच्छ तुलादण्डमलङ्कुरु ।

विश्वकर्म्मन् हविषा † —

ॐ भूर्भुवः स्वर्विश्वकर्म्माणं स्थापयामि ।
दण्डाक्षसूत्रवरद कमण्डलुधर प्रभो ।
चतुर्भुज हयारूढ़ पीताम्बर बृहस्पते ।
वाचस्पते समागच्छ तुलादण्डमलङ्कुरु ।

---

* वट सूर्य्य श्रवसा महाँ २ । असिं सत्रा देव महा २ । असि । मह्ना देवानामसुर्य्यः । पुरोहितोविभु ज्योतिरदाभ्यम् ॥

अ ३३ म ४० यजुः ।

† विश्वकर्म्मन् हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् । मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकम्मघवा सूरिरस्तु ॥

अ १७ म २२ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बृहस्पते अति *।

ॐ भूर्भुवः स्वर्बृहस्पतिं स्थापयामि।

कमण्डलुं च शक्तिं च यष्टिं दर्भमयीं क्रमात्।

कलयन्नङ्गिरोनाम कराग्राभ्यां समन्ततः।

आगच्छ भगवन् विप्र तुलादण्डमलङ्कुरु।

त्वमग्ने प्रथमो अङ्गिराः †।

प्रणियन्नाग्निनामा च कलयंश्च जपास्रजम्।

शक्तिं च पुस्तकं चैव क्रमादेव कमण्डलुम्।

आगच्छ भगवन्नग्ने तुलादण्डमलङ्कुरु।

अग्निं दूतं ‡।

ॐ भूर्भुवः स्वः अङ्गिरोग्नी स्थापयामि।

यज्ञोपवीतो हंसस्थ एकवक्त्रश्चतुर्भुजः।

प्रजापते समागच्छ तुलादण्डमलङ्कुरु।

---

* बृहस्पते अति यदर्य्यो अर्हाद्द्युमद् विभाति क्रतुमज्जनेषु।
यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम्॥
उपयाम गृहीतोऽसि बृहस्पतये त्वा।
एष ते योनिर्बृहस्पतये त्वा। अ २६ म ३ यजुः।

† त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः।
अ ३४ मं १२ यजुः।

‡ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अक्षं स्रुचं स्रुवं धत्ते कुण्डिकां च प्रजापतिः ।

ॐ प्रजापते न § ।

ॐ भूर्भुवः स्वः प्रजापतिं स्थापयामि ।

शुभ्रवर्णामहाकाया दिव्याभरणभूषिताः ।

विश्वेदेवाः समायान्त्वलङ्कुरुध्वं तुलां शुभाम् ।

विश्वे देवास: * ।

ॐ भूर्भुवः स्वर्विश्वान् देवान् स्थापयामि ।

हंसारूढ़ो महाबाहुरेकवक्त्रश्चतुर्भुजः ।

बिभ्रत् स्रुक्स्रुवं धत्ते ह्यक्षमालां च कुण्डिकाम् ।

जगद्विधातरागच्छ तुलादण्डमलङ्कुरु ।

विश्वाकर्म्मा विमनाः † ।

---

* प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयोरयीणाम् ॥

अ २३ म ६५ यजुः ।

† विश्वे देवास आगत शृणुता म इमं हवम् ।
एदं बर्हिर्निषीदत ।

अ ३४ म ७ यजुः ।

‡ विश्वकर्म्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति
यत्रा सप्तऋषीन् पर एकमाहुः ।

अ १७ म २६ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ भूर्भुवःस्वर्जगद्विधातारं स्थापयामि ।

पर्जन्यं च महाकारं गजवक्त्रत्रयान्वितम् ।
योधत्ते सर्वजीवानां वरं वीजं च शङ्खकम् ।
कुठारं च पयोजं च चिन्तारत्नं महाशुचिः ।
पाशं चक्रं किशलयं कुण्डं च दशभिः करैः ।
एतल्लक्षणसम्पन्नं तुलावन्धे निवेशयेत् ।

शन्नोवातः पवताम् * ।

पञ्चवक्त्रं वृषारूढ़ं प्रतिवक्त्रं त्रिलोचनम् ।
करालशूलखट्वाङ्गं शम्भुं खण्डेन्दुभूषितम् ।
एतल्लक्षणसम्पन्नं तुलावन्धे निवेशयेत् ।

नमः शम्भवाय † ।

ॐ भूर्भुवः स्वः पर्जन्यशम्भू स्थापयामि ।

कुशविष्टरसंयुक्तं पितरं पिण्डपात्रिणम् ।
पितरं तं समावाह्य तुलाबन्धे निवेशयेत् ।

---

* शन्नो वातः पवतां शन्नस्तपतु सूर्यः ।
शन्नः कनिक्रदद्देवी पर्जन्यो अभिवर्षतु ।

अ ३६ म १० यजुः ।

† नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च । नमः शिवाय च शिवतराय च ।

अ १६ म ४१ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नमोवः पितरोरसाय * ।

ॐ भूर्भुवः स्वः पितॄन् स्थापयामि ।

दशाश्ववाहनं सौम्यं गदापाणिं वरप्रदम् ।

उक्तलक्षणकं सौम्यं तुलाबन्धे निवेशयेत् ।

उद्बुध्यस्वाग्ने † ।

ॐ भूर्भुवः स्वः सौम्यं स्थापयामि ।

चतुर्वक्त्रं चतुष्पादं चतुर्बाहुं सिताम्बरम् ।

सर्वलक्षणसम्पन्नं श्वेतं धर्म्मं विचिन्तयेत् ।

दक्षिणे चाक्षमाला च तस्य वामे तु पुस्तकम् ।

उक्तलक्षणकं धर्म्मं तुलाबन्धे विचिन्तयेत् ।

जङ्घाभ्यां पद्भ्याम् ‡ ।

ॐ भूर्भुवः स्वः धर्म्मं स्थापयामि ।

चतुर्दन्तगजारूढ़ं वज्रहस्तं पुरन्दरम् ।

---

* नमोवः पितरोरसाय । नमोवः पितरः शोषाय ।
नमोवः पितरोजीवाय । नमोवः पितरः स्वधायै ।
नमोवः पितरोघोराय । नमोवः पितरोमन्यवे ।
नमोवः पितरः पितरोनमोवः ।　　अ २ म ३२ यजुः ।

† उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्त्ते संसृजेथामयं च ।
अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ।
　　अ १५ म ५४ यजुः ।

‡ जङ्घाभ्यां पद्भ्यां धर्म्मोऽस्मि विशि राजा प्रतिष्ठितः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शचीपतिं वज्रहस्तं सहस्रनयनोज्ज्वलम् ।
उक्तलक्षणकं शक्रं तुलाबन्धे निवेशयेत् ।

त्रातारमिन्द्रम् * ।

ॐ भूर्भुवः स्वः सुरराजं स्थापयामि ।
तरुणौ देवभिषजौ स्वश्वारूढौ महाबलौ ।
तयोरोषधयः कार्य्या दिव्या दक्षिणहस्तयोः ।
वामयोः पुस्तके कार्य्ये दर्शनीयतमाविमौ ।
उक्तलक्षणसम्पन्नौ तुलाबन्धे निवेशयेत् ।

या वां कशा † ।

ॐ भूर्भुवः स्वः अश्विनौ स्थापयामि ।
वरुणं यादसामीशं लोकेशं पाशपाणिनम् ।
उक्तलक्षणकं देवं तुलाबन्धे निवेशयेत् ।

तत्वा यामि ‡ ।

---

* त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ।
अ २० म ५० यजुः ।

† या वां कशा मधुमत्यश्विना सूनृतावती ।
तया यज्ञं मिमिक्षतम् ।
उपयाम गृहीतोऽस्यश्विभ्यां त्वा । एष ते योनिर्माध्वीभ्यां त्वा । अ ११ म ७ यजुः ।

‡ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेहबोध्युरुशंस मान आयुः प्रमोषीः ।
अ १८ म ४९ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ भूर्भुवः स्वः वरुणं स्थापयामि ।
पद्मपाणिं तथा मित्रं कमलासनसंस्थितम् ।
द्विभुजं श्वेतमूर्त्तिं च सर्वभूतहिते रतम् ।
वरुणं सरितामीशं लोकेशं पाशपाणिनम् ।
मित्रावरुणकौ देवौ तुलाबन्धे निवेशयेत् ।

अयं वां मित्रावरुणा * ।

ॐ भूर्भुवः स्वः मित्रावरुणौ स्थापयामि ।
इन्द्रेण सप्तधाच्छिन्नं दितेः पुत्रं मरुद्गणम् ।
महावीर्य्यं महाबाहुं तुलाबन्धे निवेशयेत् ।

मरुतोयस्य † ।

ॐ भूर्भुवः स्वः मरुद्गणं स्थापयामि ।
नरयुक्तविमानस्थं कुवेरं चोत्तरेश्वरम् ।
निधीनां च पतिं श्रेष्ठं राजराजं महाबलम् ।
उत्तलक्षणसम्पन्नं तुलाबन्धे निवेशयेत् ।

वयं सोम ‡ ।

---

* अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् ।
उपयाम गृहीतोऽसि मित्रावरुणाभ्यां त्वा । अ ७ म ९ यजुः ।

† मरुतोयस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमोजनः ।
अ ८ म ३१ यजुः ।

‡ वयं सोम व्रते तव मनस्तनूषु विभ्रतः । प्रजावन्तः सचेमहि ।
म १० सू ५७ ऋक् ६ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ भूर्भुवः स्वः धनेशं स्थापयामि ।

वरदोभक्तलोकानां किरीटी कुण्डली गदी ।

गन्धर्वः पुरुषोध्येयो वीणावाद्यरतः सदा ।

एवं गन्धर्वकं देवं तुलावन्धे निवेशयेत् ।

यमेन दत्तं * ।

ॐ भूर्भुवः स्वः गन्धर्वं स्थापयामि ।

जलेशं यादसामीशं पाशपाणिं महाबलम् ।

उक्तलक्षणकं देवं तुलावन्धे निवेशयेत् ।

इमं मे वरुण † ।

ॐ भूर्भुवः स्वः जलेशं स्थापयामि ।

प्रादक्षिण्याद्दक्षिणाधः करादारभ्य नित्यशः ।

वहन् कौमोदकीं पद्मशङ्खचक्रैरलङ्कृतः ।

उक्तलक्षणकं विष्णुं तुलावन्धे निवेशयेत् ।

विष्णोरराटमसि ‡ ।

---

* यमेन दत्तं त्रितएनमायुनगिन्द्र एनं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट ।
अ २९ म १३ यजुः ।

† इमं मे वरुण श्रुधि हवमद्या च मृडय ।
त्वामवस्युराचके । अ २१ म १ यजुः ।

‡ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थः । विष्णोः स्यूरसि ।
विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवे त्वा । अ ५ म २१ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ॐ भूर्भुवः स्वः विष्णुं स्थापयामि ।

ततो गोविन्दप्रतिमां समौक्तिकस्रजं तुलामभ्य वहन् कौमोदकीमिति पुराणमन्त्रेण * अनन्तरं पठितेन सहस्रशीर्षेति वैदिकेन च ।

ॐ भूर्भुवः स्वः गोविन्दं स्थापयामि ।

इत्यृचा लम्बयेत् ।

ततो निकामे निकामे † । दधिक्राव्णः ‡ । शिवोभव § । यतोयतः ‖ । स्थिरो भव ¶ । एतैर्मन्त्रैः स्तम्भद्वयमुत्तरसंस्थं संपूज्य

---

* ६४ पृष्ठे उक्तेन ।

† निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ।

अ २२ म २२ यजुः ।

‡ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत् प्रण आयूंषि तारिषत् ।

अ २३ म ३२ यजुः ।

§ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवी अभिशोचीर्मान्तरिक्षं मा वनस्पतीन् ॥

अ ११ म ४५ यजुः ।

‖ यतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्यो अभयं नः पशुभ्यः ॥ अ ३६ म २२ यजुः ।

¶ स्थिरोभव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः । अ ११ म ४४ यजुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एतैरेव मन्त्रैः पुनस्तुलाप्रान्तद्वयं संपूज्य तुलासमन्ततः पूर्वादिदिक्षु इन्द्रादीन् सम्पूज्य दीपान् प्रज्वालयेत् ।

ततोद्वारजापकाः स्वस्वशाखोक्तां शान्तिं पठेयुः । ततोऽधिवासनदक्षिणादाने ।

ॐ अद्येत्यादि देशादि सङ्कीर्त्य अमुकप्रवरान्विताय अमुकगोत्राय अमुकशर्मणे आचार्य्याय (अमुकप्रवरोऽमुकगोत्रः) अमुकशर्माऽहमधिवासनकर्म्मणः साङ्गतासिद्ध्यर्थं दक्षिणां सम्प्रददे ।

इति ।

एवं ब्रह्मादिभ्योऽपि आचार्य्यार्द्धदक्षिणा देया ।

इदमधिवासनं निशीथे कार्य्यम् ।

अधिवासनानि सर्वाणि मध्यरात्रे तु कारयेत् ।

इति विष्णुधर्म्मोत्तरवचनात् ।

ततोजागरणेन तां निशामतिवाहयेयु ।

ततः प्रभाते कृतनित्यक्रियाः सर्वे भवेयुः ।

ततोयजमानः प्राग्वत् पुण्याहवाचनादिकं कुर्य्यात् ।

तत ऋत्विजो यजमानान्वारब्धाः स्वस्वकुण्डे ऋग्वेदादिक्रमेण पूर्णाहुतिप्रभृति यथाशाखं कर्मसमाप्तिं कुर्य्युः । यस्य स्मृत्याच ।

अनेन होमकर्म्मणा कर्म्माङ्गदेवताः प्रीयन्तां न ममेति वदेत् । ततस्तुलामध्यावेदिपश्चिमोपविष्टं यजमानं गुर्वादयः कलसोदकेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्त्वगाचोक्तवैदिकमन्त्रैः * पौराणमन्त्रैश्च अभिषिञ्चेयुः ।

ततः सर्वौषधीभिरनुलिप्य शुद्धजलेन स्नात आचान्तोयजमानः शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः कृतत्रायुषकरणो गृहीतकुसुमाञ्जलिस्तुलां त्रिः प्रदक्षिणीकृत्य महावेद्यां पश्चिमे प्राङ्मुख उपविश्य एभिर्मन्त्रैस्तुलामनुमन्त्रयेत् ।

नमस्ते सर्वभूतानां शक्तिस्त्वं (सत्य) सर्वमाश्रिता ।
साक्षिभूता जगद्धात्री निर्म्मिता विश्वयोनिना ।
नमस्ते सर्वभूतानां साक्षिभूते सनातनि ।
पितामहेन देवि त्वं निर्म्मिता परमेष्ठिना ।
त्वया धृतं जगत् सर्वं वह्निः स्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ।
ब्रह्मणोदुहिता त्वं हि त्वं सत्यं परमाश्रिता ।

---

* वैदिकमन्त्रा यथा —

आपोहिष्ठाइत्यादयः । त्रातारमिन्द्रमित्येका । वरुणस्योत्तम्भनमसीति पञ्च । पुनन्तु मा पितर इति नव । शिरोमे इति पञ्च । पौराणास्तु

सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणोविभुः ।

इत्यादिकाः ।

सरितः सागराः शैलास्तीर्थानि जलदानदाः ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ।

इत्यन्तामत्स्यसूक्तोक्तामन्त्राः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काश्यपी गोत्रतश्चैव नामतोविश्रुता तुला ।
प्रसादं कुरु कल्याणि सान्निध्यं देहि शाम्भवि ।
एकतः सर्वसत्यानि तथानृतशतानि च ।
धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते ।
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तुते ।
योऽसौ तत्त्वाधिपोदेवः पुरुषः पञ्चविंशकः ।
स एषोऽधिष्ठितोदेवि त्वयि तस्मान्नमोनमः ।

ततस्तुलामध्यविलम्बितगोविन्दमनुमन्त्रयेत् ।

यथा —

नमो नमस्ते गोविन्द तुलापुरुषसंज्ञक ।
त्वं हरे तारयस्वास्मानस्मात् संसारसागरात् ।

ततोऽञ्जलिस्थकुसुमानि तुलायां हरौ च विकीर्य्य पुनस्तुलां प्रदक्षिणीकृत्य दक्षिणकरमुष्टौ हैमीं सूर्य्यप्रतिमां वामकर-मुष्टौ हैमीं धर्म्मराजप्रतिमां च आदाय नित्यदेवं च गृहीत्वा लक्ष्मीनारायणौ स्मरन् प्राङ्मुख उत्तरशिक्ये तुलामारुह्य गोविन्द-प्रतिमामुखं पश्यन्नासीत । आरोहणसमये रुद्राध्यायो * जप्यः ।

---

* नमस्ते रुद्र मन्यवे उतोत इषवे नमः । बाहुभ्यामुत ते नमः ।
इत्यादिको यजुर्वेदे मन्त्रः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ततः ऋत्विगादयः दक्षिणाग्निकोणे यजमानमानाभ्यधिकं सुवर्णादि द्रव्यं निदध्युः । पुष्टिकामनायां तु अधिकद्रव्यप्रक्षेपेण भूमिसंस्थितां तुलां कुर्य्युः । ततोयजमानो गोदोहनमात्रं तत्र स्थित्वा ततोऽवतीर्य पुनन्तु मां देवजना इति त्र्यचं * पठित्वा पौराणान् मन्त्रान् पठेत् ।

यथा —

नमस्ते सर्वभूतानां साक्षिभूते सनातनि ।
पितामहेन देवि त्वं निर्म्मिता परमेष्ठिना ।
त्वया धृतं जगत् सर्वं सह (वह्निः) स्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ।

इति

जपेन्मन्त्रांस्तु पौराणान् पुनन्तु मेति वै त्र्यचम् ।
आरोहयेद्विधानेन रुद्राध्यायेन वै नृप ॥

इति वह्निपुराणोक्तेः ।

एवं तुलामभिमन्त्र्य दानीयद्रव्याण्यभिमन्त्रयेत् ।

---

† पुनन्तु मां देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम् ।
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा क्रतूँरनु । यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।
ब्रह्म तेन पुनातु मा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा पवित्रमतुलमपत्यं जातवेदसः ।
तथा स्वेन पवित्रेण सुवर्णं हि पुनातु माम् ।
रुद्रस्य तु महत्तेजः कार्त्तिकेयस्य सम्भवः ।
तथा स्वेन पवित्रेण सुवर्णं हि पुनातु माम् ।
यथाग्निर्देवताः सर्वाः सुवर्णं हि तदात्मकम् ।
तथा स्वेन पवित्रेण सुवर्णं हि पुनातु माम् ॥
यत् कृतं मे स्वकायेन मनसा वचसाथवा ।
दुष्कृतं तत् सुवर्णस्थं यातु मुक्तिं परां शुभाम् ।

इत्यनेन सुवर्णम् ।

रुद्रनेत्रसमुद्भूतं रजतं पितृवल्लभम् ।
प्रदानादस्य मे रुद्रः प्रीयतां भक्तवत्सलः ।

इत्यनेन रजतम् ।

ताम्रं पुष्टिकरं सर्वदेवप्रियकरं शुभम् ।
सर्वरक्षाकरं नित्यमतः शान्तिं प्रयच्छ मे ।

इत्यनेन ताम्रम् ।

एवं पठित्वा तुलितद्रव्यार्धमाचार्य्याय दद्यात् ।
अपरार्धमृत्विग्भ्यः । एवमुत्सर्गद्वयमित्येके ।
गुर्वृत्विग्भ्यः सर्वेभ्यएकएवोत्सर्गइत्यन्ये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ उत्सर्गप्रयोगः ।

वेदिपश्चिमे उपविश्य प्राङ्मुख आचान्तः कर्त्ता तुलाद्रव्यं तुलसीकुशोदकेन प्रोक्ष्य अभ्यर्च्य च साक्षतकुशजलपाणिर्देशादिकं स्मृत्वा कामनायां एकैकमन्वन्तरकालावच्छिन्नप्रतिलोकपालस्थाननिवासपूर्वकार्कवर्ण (सुवर्ण) किङ्किणीजालमालिविमानावस्थानानन्तर–भूपाल–मौलिमणिरञ्जित-पादपीठ–श्रद्धान्वितयज्ञसहस्रयाजिदोर्दण्डप्रतापजितसर्वमहीपलोकभूमण्डलाधिकरणकराजराजत्वकामः, अथवा श्रीलक्ष्मीसहितविष्णुप्रीति–कामः सर्व–पापक्षयकामो वा अमुकप्रवरान्वितोऽमुकगोत्रोऽमुकशर्म्माहमेतत् स्वशरीरसमतोलितसुवर्णादिद्रव्यार्द्धादि अग्निदैवतं रजतं चेत् चन्द्रदैवतं ताम्रं चेत् सूर्य्यदैवतं तुभ्यममुक-गोत्राय अमुक-शर्म्मणे आचार्य्याय (सम्प्रददे) त्वदनुज्ञया नाना–शाखाध्यायिभ्यो नानागोत्रेभ्यो नानाशर्म्मभ्यः अन्येभ्यश्च ब्राह्मणेभ्यो दीनानाथेभ्यश्च संप्रददे न ममेति करस्थं जलं गुरुहस्ते निःक्षिपेत् ।

स चाचार्य्यो ब्राह्मणे यजमाने सोङ्कारमुच्चैःस्वरेण क्षत्रिये निरोङ्कारं मन्द्रस्वरेण वैश्ये उपांशु शूद्रे तु मनसा स्वस्तीत्युक्त्वा सावित्रीं पठित्वा द्रव्यं स्पृष्ट्वा स्वशाखोक्तां कामस्तुतिं पठेत् ।

पुनर्देशादि सङ्कीर्त्य अपरं द्रव्यार्द्धमग्निदैवतं अमुकगोत्रेभ्योऽमुकशाखाध्यायिभ्योऽमुकशर्म्मभ्य ऋत्विग्भ्यो जापकेभ्यो द्वार–

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पात्रेयो युष्मदनुज्ञया नानाशाखाध्यायिभ्यो नानागोत्रेभ्यो नानाशर्मभ्योऽन्येभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च सम्प्रददे न ममेति उक्त्वा ऋत्विगादिहस्ते जलं क्षिपेत्।

ते च पूर्ववत् स्वस्तीत्यादि पठेयुः। वरणक्रमेण गुरुकराधःस्थितोत्तानदक्षिणकरेभ्यः सर्वेभ्यो युगपदेव गुर्वादीनां गोत्राद्युच्चार्य पूर्ववद् युगपदेव वा उत्सर्गः कार्यः। पुनर्देशादि स्मृत्वा कृतैतत्तुलापुरुषमहादानप्रतिष्ठार्थं दक्षिणां शतं सुवर्णान् ग्रामरत्नवस्त्रगोऽश्वगजादीनि अमुकगोत्रेभ्यो-ऽमुकशर्मभ्योऽमुक-शाखाध्यायिभ्यो गुर्वृत्विग्भ्यो युष्मभ्यं सम्प्रददे न ममेति पूर्ववत्।

अथवा होत्रादिभ्यो यथाशक्ति सुवर्णं दक्षिणां दद्यात्। मुक्ताफलसहस्राढ्यं यथोपकल्पितां च भूमिं गुरवे दद्यात्। यदा तु गुरुहीतव्य एव तुलाद्रव्यं विभज्य दीयते तदा द्वारपालेभ्यो जापकेभ्यश्चापरा दक्षिणा देया।

केचन हिरण्यादिना गुर्वादीन् परितोष्य अन्येभ्यो दीनानाथेभ्य (स) एव तुलाद्रव्यं विभज्य दद्यादित्याहुः। ततः सहस्रं शतं वा यथाशक्ति ब्राह्मणान् भोजयेत्। पुनः पुण्याहवाचनं कृत्वा पादक्षिण्येन गत्वा आवाहितग्रहादीन् पूजयित्वा प्रणम्य "यान्तु देवगणा *" इत्यादिना विसृज्य च प्रतिमां

---

* यान्तु देवगणाः सर्वे पूजामादाय (यांत्रिकात्) पार्थिवीम्। इष्टकाम-समृद्ध्यर्थं पुनरागमनाय च।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सोपस्कारां मण्डपवितानादिकं च आचार्य्याय दद्यात् ।
केचिदत्रावसरे आज्यावेक्षणं कुर्वन्ति ।

तत्प्रकारस्तु । कांस्यपात्रे आज्यमासिच्य तत्र हिरण्यं प्रक्षिप्य तत्र आत्मप्रतिबिम्बमवलोक्य —

आज्यं तेजः समुद्दिष्टमाज्यं पापहरं स्मृतम् ।
आज्यं सुराणामाहार आज्ये लोकाः प्रतिष्ठिताः ॥

इति मन्त्रमुक्त्वा ब्राह्मणाय दद्यात् ।

ततः —

प्रमादात् कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति (स्मृतिः) श्रुतिः ॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्पितम् ।
तत् सर्वं पूर्णतां यातु भास्करस्य प्रसादतः ॥

इति पठेत् ।

ततः —

मया कृतेनानेन अमुकतुलापुरुषदानकर्म्मणा भगवान् विष्णुः प्रीयतां न ममेत्युक्त्वा न्यूनातिरिक्ततापरिहारार्थं विष्णुस्मरणं करिष्ये इत्युक्त्वा ॐ अच्युतानन्दगोविन्दाय नम इति मन्त्रं दशवारं जप्त्वा अञ्जलिं वद्ध्वा विप्रान् प्रार्थयेत् । भोः श्रीमन्तः । मया यत् कृतं तुलापुरुषदानाख्यं कर्म्म देशतः कालतो मन्त्रतो भक्तितोद्रव्यतः प्रक्रियया न्यूनातिरिक्तं तद्विष्णुस्मरणाद् भवतां ब्राह्म-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

णानां वचनाच्च परिपूर्णमस्तु इति मे भवन्तोब्रुवन्तु इति यजमानेनोक्ते सर्वं परिपूर्णमस्त्विति ब्राह्मणा ब्रूयुः ।

ततो ब्रह्मार्पणम् । चतुर्भिश्च ब्रह्मार्पणम् ।

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ॥

इति भगवद्गीतोक्तेः ।

मन्त्रचतुष्टयं यथा —

नमोविश्वसृजे तुभ्यं विश्वरूपात्मने नमः ।
परमानन्दरूप त्वं पाहि संसारकर्द्दमात् ॥
तेजोमयमिमं ध्येयं सदा पश्यन्ति योगिनः ।
स त्वं भवादुद्धर मां देहि मुक्तिं सनातनीम् ॥

यथा (च) हि भूरादिसमस्तलोका
त्वयि स्थिता देववरेश नित्य ।
तथा (अमी) सुराद्ये सुरलोकपाला
ब्रह्मादयोदेवगणाश्च नित्यम् ॥
(त्वत् सत्) तव प्रसादादहमप्यशेष
पापैर्विमुक्तस्तु यथा भवेयम् ।
तथा कुरु त्वं सततं मुरारे
विष्णो नृसिंहेश नमोनमस्ते ॥

ॐ तत् सद् ब्रह्मार्पणमस्तु इत्युक्त्वा ब्राह्मणाशिषो गृहीत्वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सानुनयं ताम् विसृज्य सुहृन्मित्रादियुतः सोत्साहमिष्टान्नादिकं भुञ्जीत ।

तुलाद्रव्यं गृहे चिरं न धारयेत् ।

तथाच —

ब्रह्मवैवर्त्तम् ।

दातव्यमिति नो जातु वक्तव्यं मनुजैः क्वचित् ।
अहोरात्रमतिक्रम्य तद्दानं द्विगुणं भवेत् ॥
दशोत्तरं पर्वसु तच्छतं चन्द्रग्रहे भवेत् ।
सूर्य्यग्रहे सहस्रं तु मरणेऽनन्तकं स्मृतम् ॥
तस्माद्दातव्यमित्यु(क्त्वा)क्ते देयमेव नचान्यथा ।
बुधैस्तदेव वक्तव्यं दातुं शक्यं यदेव हि ।
उक्ता न दीयते यद्वि यातनावहमेव तत् ॥

इति

अयं सुवर्णतुलाविधिः रजतताम्रतुलादावतिदिश्यते । न्याय-साम्यात् । एवं कुर्वतः फलमुक्तं स्कान्दे

अनेन विधिना यस्तु तुलादानं करोति वै ।
पुण्यकाले तु सम्प्राप्ते स पदं याति वैष्णवम् ।
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पकोटिशतं वसेत् ॥
पुत्रपौत्रप्रपौत्रांश्च तारयेदेकविंशतिम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देदीप्यमानवपुषा विजितप्रभाव
माक्रम्य मण्डलमखण्डकचन्द्रभान्वोः ।
सिद्धाङ्गनानयनषट्पदपीयमान
वक्त्राम्बुजोऽम्बुजमयेन चिरं सहास्ते ॥
इति पठति यइत्थं यः शृणोति प्रसङ्गा
दपि कलुषवितानैर्मुक्तदेहः समन्तात् ।
दिवममरवधूभिर्याति संप्रार्थ्यमानः
पदममरसहस्त्रैः सेवितं चन्द्रमौलेः ॥

इति श्रीमत्परमवैदिकश्रीमन्नागदेवभट्टसुतेन अनन्तभट्टेन
विरचिते विधानपारिजाताख्य–निबन्धे
तुलापुरुषदानप्रयोगः समाप्तः ।

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ प्रसङ्गाद्रजतादितुलापुरुषदानविधिः ।

तत्र गोपथब्राह्मणे सुवर्ण-तुलापुरुष-विधानं प्रकारान्तरेणोक्ता ।

अथ चेन्निःस्वपक्षः स्याद् यथा सम्पद्यते धनम् ।
धातुभिः सह तोल्यस्तु वासोभिश्च रसैस्तथा ।
व्रीह्यादिभिः सर्वधान्यैर्यथा सम्पद्यते गृहे ॥

एतत्फलमप्युक्तं तत्रैव —

यत् पापं स्वकुले जातस्त्रिसप्तपुरुषैः कृतम् ।
तत् सर्वं नश्यति क्षिप्रमग्नौ तूलं यथा तथा ॥

अनामयं स्थानमवाप्य देवै
रलङ्घनीयं सुकृतं हि रम्यम् ।
समस्तदोषात् परिमुक्तपापा
द्दिवीन्द्रवद्राजति सूर्य्यलोके ॥

सूर्य्यलोके दिवीत्यभेदेन सम्बन्धः ।

भविष्योत्तरेऽपि मत्स्यपुराणरीत्या हेमतुला उक्ता ।

कृष्णउवाच —

अनेनैव विधानेन केचिद्रूप्यमयीं तुलाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्पूरेण तथेच्छन्ति केचिद्ब्राह्मणपुङ्गवाः ॥

अनेन हेमतुलोक्तेनेत्यर्थः —

तथा सिततृतीयायां नार्य्यः सौभाग्यदां तुलाम् ।
कुङ्कुमेन प्रयच्छन्ति लवणेन गुड़ेन वा ।
न तत्र होमो मन्त्रो वा एवमेव प्रदीयते ॥

विश्वामित्रः —

आदित्ये राहुणा ग्रस्ते सुवर्णैस्तोलयेत्तनुम् ।
सोमग्रहे तु रूप्येण यथादानं तथा शृणु ॥
प्रवर्ग्यस्य मुखे युक्तादुत्पन्नः पवित्रदेहतः ।
सर्वपापहरायैतद्ददामि प्रीयतां विभुः ॥
इत्युच्चार्य्य जलं त्वप्सु निक्षिपेद्द्विजसत्तम ।
प्रीयन्तां पितरः कांस्ये ताम्रे चैव पितामहः ॥
लवणे सिन्धु (सीधु) जे लक्ष्मीः प्रीयतां पार्वती गुड़े ॥
गन्धैर्गुड़ैर्वा वासोभिः सौभाग्यं लवणे परम् ।
प्रीयतां विश्वधात्रीति दानमन्त्रोविधीयते ।
तुलापुरुषतोराजन् याति तत् परमं पदम् ।
सर्वपापविशुद्धात्मा मुक्तिं यात्यपुनर्भवाम् ॥
हत्वा तु ब्राह्मणं भूप तोलयेदात्मनस्तनुम् ।
सुवर्णनात्मतुल्येन ब्रह्महत्यां व्यपोहति ॥

अत्र सुवर्णरजततुलायां प्रवर्ग्यस्येत्यादिमन्त्रं, कांस्यादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुलायां तु प्रीयन्तां पितर इत्यादि मन्त्रं, गन्धगुड़ायसः-सिन्धु-जातिरिक्तलवणतुलायां विश्वधात्रीत्यादिमन्त्रं, गुड़तुलायां प्रीयतां पार्वतीत्यादिकं वा मन्त्रमुक्त्वा जले जलप्रक्षेपः कार्य्यः । फलं तु कांस्यादितुलायां सौभाग्यमेव, फलान्तरानुक्तेः । लवणे तु परमधिकं सौभाग्यम् । उपक्रान्तयोः सुवर्ण-रजत-तुलयोः फलं तुला-पुरुषत इत्यादिनोक्तं वेदितव्यम् । सुवर्णतुलायां तु ब्रह्महत्यादुरितनाशोऽपि भवतीति वचनस्वारस्येनार्थः । वाख्या-नान्तरं तु वचनानां दोषग्रस्तत्वादुपेक्ष्यम् ।

अत्र हेमाद्रितुलायामेतावत्येव इतिकर्त्तव्यता । अधिके मानाभावात् ।

अत्र अनुक्तदक्षिणत्वात् सामान्यतोविहितसुवर्णादन्यूनमधिकं वा यथाशक्ति दक्षिणा देया ।

इति रजतादितुलापुरुषदानविधिः ।

अथ लोहतुलापुरुषदानविधिः ।

स्कान्दे —

लोहनामाऽभवत् पूर्वं दानवः सुमहाबलः ।
स देवैः समरे क्रुद्धैर्बहुधा शकलीकृतः ॥
तदङ्गमभवत् सर्वं लोहं यद्दृश्यते क्षितौ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आत्मानं तोलयित्वा तु दद्याल्लोहं तु तत्समम् ।
द्विजाय शिवभक्ताय तथान्यस्मै द्विजातये ।
पादुकोपानहच्छत्र-चामरासन-संयुतम् ।
अयने विषुवे पुण्ये व्यतिपातादिपर्वसु ।
श्रद्धायुतः शुचौ देशे विशेषादुत्तरायणे ।
पञ्चामृतेन संस्नाप्य देवदेवमुमापतिम् ।
केवलेन घृतेनाथ प्रस्थमात्रेण धूर्ज्जटिम् ।
सुगन्धिचन्दनजलैस्ततः संस्नापयेद्विभुम् ।
चन्दनागुरुकक्कोलकर्पूरमृगनाभिभिः ।
विलिप्य परमेशानं सुमनोभिरथार्च्चयेत् ।
भक्त्या निवेद्य नैवेद्यमनवद्येन चेतसा ।
ततः प्रणम्य जगतामीश्वरं प्रार्थयेदिति ।
देवदेव जगन्नाथ कृपालो परमेश्वर ।
मामुद्धरस्व संसारपङ्कसङ्कोचदुःखितम् ।
इति संप्रार्थ्य योदद्याल्लोहमात्मसमं नरः ।
स याति शिवसालोक्यं यावदिन्द्राश्चतुर्द्दश ।
ततः पुनरिहायातः पृथिव्यामेकराड् भवेत् ॥

अत्रापि पूर्ववद्दक्षिणा । अनुक्तदक्षिणेषु दानेषु तस्या यथाशक्ति विहितत्वात् ।

इति लोहतुलापुरुषदानविधिः ।

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति लौहतुलापुरुषदानविधिः ।

अथ नानारोगघ्नलोहादितुलापुरुषदानविधिः ।

गरुड़पुराणे —

सनत्कुमारउवाच —

तुलापुरुषदानं तु शृणु मृत्युञ्जयोद्भवम् ।
अष्टलोहं प्रदातव्यं सर्वरोगोपशान्तये ।
कांस्यं च यक्ष्मके देयं त्रपु चार्शोविकारके ।
अपस्मारे च सीसं स्यात्ताम्रं कुष्ठे सुदारुणे ।
पित्तलं रक्तपित्ते च रूप्यं प्रदरमेहयोः ।
सुवर्णं सर्वरोगेषु प्रदद्यान् मृत्युनोदनम् * ।
फलोद्भवं तथा दद्याद् ग्रहणी-दारुजे रुजौ † ।
गौड़ं भ (च) स्मकरोगेषु योगं तु गण्डमालके ।
जाङ्गलं चाग्निमान्द्ये तु रोमोत्पाते तु पौश्य (ष्य) कम् ।

जाङ्गलं काष्ठजमित्यर्थः ।

मधूद्भवं तथा देयं कासश्वासजलोदरे ।
घृतोद्भवं तथा देयं छर्द्दिरोगोपशान्तये ।
क्षीरं पित्तविनाशाय दाधिकं भगदारणे ।

---

* मृत्युनोदनमित्यत्र मृत्फलोदनमिति हेमाद्रौ पाठः ।

† ग्रहणी दीर्घदारुणे इति हेमाद्रौ पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लावणं वेपनाशाय पैष्टं दद्रुविनाशने ।
अन्नं च सर्वरोगाणां नाशने स्मृतमेव च ।

वेप: कम्पस्तद्रोगइत्यर्थ: ।

अधिदैवतं च लोहे महाभैरवउच्यते ।
कांस्ये पूषा चाश्विनौ च वायुश्च सीसके स्मृत: ।
ताम्रे सूर्य्यस्तथा प्रोक्त: पैत्तले च कुजस्तथा ।
रौप्ये च पितरोज्ञेया: सुवर्णे सर्वदेवता: ।
फले सोमोगुड़े चापस्ताम्बूले तु विनायक: ।
गन्धर्वा: कुसुमे चैव जाङ्गलेऽग्निस्तथा स्मृत: ।
मधौ यक्षा: प्रयत्नेन घृते मृत्युञ्जय: स्मृत: ।
क्षीरे तारागणा: सर्वे दध्नि सर्पा: प्रकीर्त्तिता: ।
पिष्टे प्रजापतिर्देवश्चान्ने सर्वाश्च देवता: ।
आर्त्तीयदा स्यात् पात्रं वा प्राप्नुयात् पुण्यदेश (त:) जम् ।
नित्यं (मृत्यु) मृत्युञ्जयप्राप्तविधिना यत् प्रदीयते ।
तदेव सर्वशान्त्यर्थं भवतीह न संशय: ।
तुलापुरुषदोऽनेन मृत्युं जयति मानव: ।

अत्र अधिदेवतोत्कीर्त्तनं तत्तत्तुलादाने तत्तत्-पूजा विधानार्थम् । मृत्युञ्जयप्राप्तविधिना मृत्युञ्जयपूजोपयुक्तोदित प्रकारेण मृत्युञ्जयं पूजयित्वेत्यर्थ: ।

तत् पूजाविधिश्चोक्तो देवीपुराणे —

मृत्युञ्जयश्च देवोऽयं चतुर्भुजस्त्रिनेत्रक: ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अक्ष-मालाधरोदेवो दक्षिणेन तु पाणिना ।
वामेनामृतकुण्डीं च धारयन्नमृतान्विताम् ।
वरदाभयपाणिश्च सर्वाभरण-भूषितः ।
शुक्लः सुनीलवासाश्च पद्मस्योपरि संस्थितः ।
जाती हृच्च शिरोज्ञेयं जूयष्टं च शिखा स्मृता ।
जे वौषडिति कवचं, जौ नेत्रे च प्रकीर्त्तिते ।
जः फड़स्त्रं समुद्दिष्टं षड़ङ्गोऽयं भवेत् सदा ।
ॐ स्वाहावाहने मन्त्र ॐकारोवै विसर्ज्जने ।
अष्टौ वै शक्तयः प्रोक्ताः पञ्चाक्षरसमन्विताः ।
जया च विजया चैव अजिता चापराजिता ।
भद्रकाली कपाली च क्षेम्या मृत्युपराजिता ।
(ॐ) जूं समन्त्रप्रयोगेण पूज्योमृत्युञ्जयः शिवः ।
मन्त्रादिभिर्यथाम्नायं यथा ब्राह्मणपूजनम् ।
मृत्युञ्जयोक्तदानेषु सर्वेष्वेवं विधिः स्मृतः ।
ॐ जूंसइतिवै दातुः कामौघं साधयेत् सदा ।

गारुड़े च —

लोहे तदा मन्त्रममुं गृहीतुर्हृदि रोपयेत् ।
शिरोललाटे कण्ठे च जिह्वामूले च गण्डयोः ।
नाभौ च ब्रह्मगुह्ये च एतदङ्गाष्टकं न्यसेत् ।
अरत्निर्हस्तमात्रं वा सारं तस्य प्रकीर्त्तितम् ।
यथेच्छया प्रयोगेण यथावत् कर्त्तुरिच्छया ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षष्ठ्या पलैः संघटितमष्टातपलिकं भवेत् ।
लोहनिष्पन्नमेवैतत्सन्नवान्नेन मिश्रितम् ।
पञ्चाशत्पलसंयुक्तं दण्डं चायससंज्ञितम् ।
वस्त्रैराच्छाद्य दानेन यमदण्डेन विद्यते ।

इति

अत्रापि सुवर्णं दक्षिणा देया ।

इति नानारोगघ्नलोहादितुलापुरुषदानविधिः ।

अथ विष्णुधर्म्मोत्तरोक्तघृतादितुलापुरुषदानविधिः ।

शङ्कर उवाच —

तुलादानं प्रवक्ष्यामि सर्वपापविनाशनम् ।
यद्गौर्य्याचरितं पूर्वं तथा नारायणेन च ।
पुण्यं दिनमथासाद्य तृतीयायां विशेषतः ।
गोमयेनोपलिप्तायां भूमौ कुर्य्याद्घटं शुभम् ।
दारवं शुभवृक्षस्य चतुर्हस्तप्रमाणतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपरितनोदण्डोधटम् —

सुवर्णं तत्र वध्नीयात् स्वशक्त्या घटितं धटे ।
शिक्यद्वयं तु वध्नीयादभितोधुटिके ततः ।
तत्रारोहेत् स्वस्वस्य पुष्पालङ्कारभूषितः ।
अभीष्टदेवतां गत्वा स्नापयित्वा घृतादिभिः ।
तुलादानस्य सर्वस्य विधिरेष प्रकीर्त्तितः ।
सर्वस्य वच्यमाणघृतादितुलापुरुषदानस्येत्यर्थः ।
प्रथमा तु घृतस्योक्ता तेजोवृद्धिकरी तुला ।
माचिकेण तु सौभाग्यं तैलेन वहुलाः प्रजाः ।
वाससा दिव्यवस्त्राणि प्राप्णोति तुलया घृ (तम्) तः ।
लवणस्य तु लावण्यमरोगित्वं गुड़स्य च ।
असापत्नं शर्करया सुरूपं चन्दनेन तु ।
अविभक्ता भवेद्भर्त्ता (स्त्री) तुलया कुङ्कुमस्य तु ।
न सन्तापोहृदि भवेत् चीरस्य तुलया सदा ।
सर्वदानप्रदाः सर्वाः सर्वपापचयङ्कराः ।
योददाति तुलाः सर्वाः सगच्छेत परमं पदम् ।

इति

इति घृतादितुलापुरुषदानविधिः ।

———

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ पराशरोक्तगुड़ादितुलापुरुषदानविधिः ।

गुड़ं वा यदिवा खण्डं लवणं वापि तोलितम् ।
योदद्यादात्मनस्तुल्यं नारी वा पुरुषोऽपिवा ।
पुमान् प्रद्युम्नवत् स स्यान्नारी सा पार्वती यथा ।
सुवर्णदक्षिणायुक्तं सवस्त्रं भूषणान्वितम् ।
अलङ्कृत्य द्विजाग्र्यं तं परिधाय च वाससी ।
खण्डादि तोलितं पश्चाद्विप्राय प्रतिपादयेत् ।

अन्यच्च —

मन्त्रेणारुह्य च तुलां चिन्तयित्वा हरिं परम् ।
अवरुह्य ततोदद्यादर्द्धं पादमथापि वा ।
गुरुं सम्पूज्य विधिवत् स्वर्णालङ्कारभूषणैः ।
विसर्ज्जयेन् नमस्कृत्य भोजयित्वा विधानतः ।
शेषं द्विजेभ्योदातव्यं स्त्रीभ्योऽन्येभ्यस्तथैवच ।
इष्ट-वन्धु-विशिष्टानामाश्रितानां ततः परम् ।

मन्त्रेण दद्यादभिमन्त्रितां यः
सक्तुत्तुलामेकतमां द्वि (जाय) जेभ्यः ।
स याति गौर्य्याः सदनं सुपुण्यं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न शोक-दौर्भाग्य-मुपास्नुते (पुमान्) च ।

इति गुड़ादितुलापुरुषदानविधिः ।

अथ सुवर्ण-रजतताम्रव्यतिरिक्त-तुलापुरुष दानस्य प्रयोगः ।

अयनादिपुण्यकालमासाद्य यथाशक्ति मण्डपं संपाद्य तुलां सम्पादयेत् ।

तन्निर्माणप्रकारोयथा —

शाकेङ्गुदी-चन्दनदेवदारु
श्रीपर्णिविल्वप्रियकाञ्जनानाम् ।
स्तम्भद्वयं हस्तयुगावखातं
कृत्वा ऋजुं पञ्चकरोच्छ्रितं च ॥
तदन्तरं हस्तचतुष्टयं स्या
दथोत्तराङ्गं च तदङ्गमेव ।
समानजातिश्च तुलावलम्बि (नी) ता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हैमेन मध्ये पुरुषेण युक्ता ।
दैर्घ्येण सा हस्तचतुष्टयं स्यात्
पृथुत्वमस्याश्च दशाङ्गुलानि ।
सुवर्णपत्राभरणा च कार्य्या
सलोहपाशद्वयशृङ्खलाभिः ।
युता सुवर्णेन च रत्नमाला
विभूषिता माल्यविभूषणाभ्याम् ॥

ईदृशीं शिक्यद्वयावलम्बिफलकद्वयोपेतां दक्षिणोत्तरावलम्बिनीं तुलां निर्म्माय सर्वसम्भारान् समानीय धर्म्मराज सूर्य्य-विष्णु-प्रतिमाः कृत्वा गणेशगौरीष्टदेवतादीन् सम्पूज्य प्रा (र्थयित्वा) र्घ्यं देशकालौ स्मृत्वाच अमुकप्रवरोऽमुकगोत्रोऽमुकशर्म्माऽहममुककामः श्रीविष्णुप्रीतिकामोवा घृताद्यन्यतमद्रव्येण तुलापुरुषदानं करिष्ये ।

इति सङ्कल्प्य आचार्य्यं वृत्वा तस्मै वस्त्रादि दद्यात् ।

अथ आगमोक्तविधिना शुद्धेन वा मन्त्रेण त्र्यम्बकं सम्पूज्य

ततस्तोलनीयद्रव्याधिदेवतां पूर्वोक्तां सम्पूज्य कृताग्न्युत्तारणोधर्म्मराज-सूर्य्य-विष्णुप्रतिमाः सम्पूज्य विष्णुप्रतिमां तुलामध्यभागे लम्बितां बद्ध्वा दक्षिणप्रान्तबन्धादारभ्य चन्दनादिना तदधिष्ठितदेवताः पूजयेत् ।

ताश्च । ईशम् । अग्निनम् । मारुतम् । रुद्रम् । सूर्य्यम् । विश्वकर्म्माणम् । गुरुम् । अङ्गिरोऽग्नी । प्रजापतिम् । विश्वम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जगद्विधातारम् । पर्ज्जन्यशम्भू । पितृदेवताम् । सौम्यम् । धर्म्मम् । अमरराजम् । अश्विनौ । जलेशम् । मित्रावरुणौ । मरुद्गणान् । धनेशम् । गन्धर्वम् । वरुणम् । विष्णुम् । इत्येताश्चतुर्विंशति-देवताः पूजयेत् ।

ॐ भूर्भुवः स्वः अमुकं स्थापयामीति प्रयोगेण स्थापयित्वा मध्यस्थां विष्णुप्रतिमां संपूज्य

निकामे निकामे । दधिक्रावणः । शिवोभव ।

यतोयतः । स्थिरोभव । इत्येतैर्मन्त्रैः स्तम्भद्वयमुत्तर-संस्थं संपूज्य तुलायाः समन्तात् पूर्वादिक्रमेण इन्द्रादीन् संपूज्य अष्टौ दीपान् दत्त्वा गुरुणाऽभिषिक्तोयजमानोगृहीत-कुसुमाञ्जलिस्तुलां त्रिः प्रदक्षिणीकृत्य उपविश्य—

प्राङ्मुखस्तुलामनुमन्त्रयेत् ।

ॐ नमस्ते सर्वदेवानां शक्तिस्त्वं स(वँ)त्यमाश्रिता ।
साक्षिभूता जगद्धात्री निर्म्मिता विश्वयोनिना ।
एकतः सर्वसत्यानि तथानृतशतानि च ।
धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते ।
त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता ।
मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते ।
योऽसौ तत्वाधिपोदेवः पुरुषः पञ्चविंशकः ।
सएषोऽधिष्ठितोदेवि त्वयि तस्मान्नमोनमः ।

इति तुलां प्रार्थ्य मध्यस्थं विष्णुं प्रार्थयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र मन्त्रः—

नमोनमस्ते गोविन्द तुलापुरुषसंज्ञक ।
त्वं हरे तारयस्वास्मानस्मात् संसारसागरात् ।

इत्युक्त्वा गोविन्दतुलोपरि कुसुमाञ्जलिं त्रिः क्षिपेत् । पुनस्तुलां त्रिः प्रदक्षिणीकृत्य सर्वाभरणसम्पन्नो वाममुष्टौ गृहीतधर्म्मराजो दक्षिणमुष्टौ गृहीतसूर्य्य उत्सङ्ग (स्थ) स्थापितस्वेष्टदेवतः प्राङ्मुख उत्तरशिक्यमारोहेत् ।

दक्षिणेन सुवर्णं स्यादुत्तरेण स्वयं विशेत् ।

इति वचनात् ।

ततोदक्षिणशिक्ये घृतादिद्रव्यमाचार्य्योनिधाय यावत् समधिकं वा पुष्टिकामे यजमाने भूमिस्पृष्टमपि कृत्वा धार्य्यं * ।

अथ यजमानोविष्णुप्रतिमामीक्षमाणः क्षणं स्थित्वा इमं मन्त्रं पठेत् ।

नमस्ते सर्वभूतानां साक्षिभूते सनातनि ।
पितामहेन देवि त्वं निर्म्मिता परमेष्ठिना ।
त्वया धृतं जगत् सर्वं सहस्थावरजङ्गमम् ।
सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि ।

इति

---

* पाठोऽयमसङ्गतोऽपि सर्वेष्वेव आदर्शपुस्तकेषु धृततया अविकलं निवेशितः । धार्य्यं इति कैनाप्यसं तद्बोधम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घृतादितोलनीयद्रव्ये किञ्चित् सुवर्णं दत्त्वं चेत्तदा इमे मन्त्राः पठनीयाः ।

यथा पवित्रमतुलमपत्यं जातवेदसः ।
तथा त्वेन पवित्रेण सुवर्णं हि पुनातु माम् ।
रुद्रस्य तु महत्तेजः कार्त्तिकेयस्य सम्भवः ।
तथा त्वेन पवित्रेण सुवर्णं हि पुनातु माम् ।
यथाग्निर्देवताः सर्वाः सुवर्णं हि तदात्मकम् ।
तथा त्वेन पवित्रेण सुवर्णं हि पुनातु माम् ।
यत् कृतं मे स्वकायेन मनसा वचसाथवा ।
दुष्कृतं तत् सुवर्णस्य मुक्तिं यातु परां शुभाम् ।

इत्युक्त्वा अवतीर्य्य अद्येत्याद्युक्त्वा अमुककामइदं द्रव्यं अमुक-दैवत्यं घृतं चेन् मृत्युञ्जयदैवतम् आचार्य्याय अन्येभ्यो ब्राह्मणेभ्यः समाश्रितबन्धुवर्गेभ्योदीनानाथस्त्रीभ्यश्च सम्प्रददे न ममेत्युक्त्वा कृतैतत्तुलापुरुषदानप्रतिष्ठासिद्ध्यर्थं यथाशक्ति सुवर्णं दक्षिणा-माचार्य्याय दत्त्वा भूयसीं च दक्षिणामितरेभ्यो दत्त्वा ब्राह्मण-भोजनं सङ्कल्प्य तुलोपहारादिधर्म्मराजादिप्रतिमास्तुलाद्रव्या-दर्द्धं तदर्द्धं वा आचार्य्याय दत्त्वा अन्येभ्यश्च प्रतिपाद्य आज्यावेक्षणं कृत्वा प्रमादात् कुर्वतां कर्म्म । यस्य स्मृत्या च । यत् करोषि यदश्नासि । चतुर्भिश्च । एतान् मन्त्रानुक्त्वा ईश्वरे (कर्म्मफलं) समर्प्य आचार्य्यं क्षमाप्य च इष्टबन्धुभिः सह भुञ्जीत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नात्र अधिवासनादि न तत्र इति पूर्वोक्तवचनात् ।

इति सामान्यतस्तुलापुरुषदानविधानम् ।

अथ सर्वदानमन्त्रा निरूप्यन्ते ।

तत्रादौ ब्राह्मणपादप्रक्षालनं कृत्वा उदङ्मुखो यजमानः सङ्कल्पवाक्यमुच्चार्य अमुकगोत्र त्वाममुकदानसंप्रदानत्वेनाहं वृणे इति वृत्वा प्राङ्मुखब्रह्मा-दिभिः सह सम्पूज्य देयं प्रोक्ष्य अलङ्कृत्य च स्वगोत्रोच्चारणपूर्वकं देयं मन्त्रेण पात्राय दत्त्वा तत्प्रतिष्ठासिद्ध्यर्थं किञ्चिद्दक्षिणां दत्त्वा ब्राह्मणाशिषोगृहीत्वा दानफलमीश्वराय समर्पयेत् ।

इति सर्वदानविधिः ।

अथ सुवर्णादीनां दानमन्त्राः ।

तत्र सुवर्णस्य —

हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

अथ रत्नस्य —

यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः ।
तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ।

अथ रजतस्य —

रुद्रनेत्रसमुद्भूतं रजतं पितृवल्लभम् ।
प्रदानादस्य मे रुद्रः प्रीयतां भक्तवत्सलः ॥

अथ ताम्रस्य —

ताम्रं पुष्टिकरं सर्वदेवप्रीतिकरं शुभम् ।
सर्वरक्षाकरं नित्यमतः शान्तिं प्रयच्छ मे ॥

अथ कांस्यस्य —

कांस्यप्रभुः शिवः साक्षात् कांस्यमेव विभावसुः ।
कांस्यं विष्णुसमं यस्मादतः शान्तिं प्रयच्छ मे ॥

अथ लोहस्य—

यस्मादायसकार्य्याणि त्वदधीनानि सर्वदा ।
हे लोह लाङ्गलादीनि अतः शान्तिं प्रयच्छ मे ॥

अथ रौप्यपात्रस्य —

कन्यावधो गवां चैव परदारप्रधर्षणम् ।
रौप्यपात्रप्रदानेन क्षिप्रं नाशं प्रयातु मे ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ कांस्यपात्रस्य —

यानि पापान्यनेकानि कर्म्मोत्थानि कृतानि च ।
कांस्यपात्रप्रदानेन तानि नश्यन्तु मे सदा ॥

अथ ताम्रपात्रस्य —

परापवादपैशुन्यमभक्ष्यस्य च भक्षणम् ।
तत्रोत्थितं च यत् पापं ताम्रपात्रेण नश्यतु ॥

अथ तिलपात्रस्य —

देवदेव जगन्नाथ वाञ्छितार्थफलप्रद ।
तिलपात्रं प्रदास्यामि तवाङ्गे संस्थितोऽस्म्यहम् ॥

अथ वस्त्रस्य —

शासनं सर्वलोकानां लज्जायार (ल) क्षणं परम् ।
सुवेशधारिवस्त्र त्वमतः शान्तिं प्रयच्छ मे ॥

अथ पीतवस्त्रस्य —

पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् ।
प्रदानादस्य मे विष्णुः प्रीयतां भक्तवत्सलः ॥

अथ कम्बलस्य —

सर्वाधिव्याधिविध्वंसः सततं सुखमुत्तमम् ।
ऊर्णाप्रावरणस्यास्य दानाद्भवतु मे हरे ॥

अथ रक्तवस्त्रस्य —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रक्तवस्त्रयुगं यस्मादादित्यस्य च वल्लभम् ।
प्रदानादस्य मे सूर्य्यः सर्वं पापं व्यपोहतु ॥

अथ अन्नस्य—

अन्नमेव परा (रं) लक्ष्मीरन्नमेव जनार्द्दनः ।
अन्नं ब्रह्माखिलत्राणमस्तु मे जन्मजन्मनि ॥

अथ गोः —

यज्ञसाधनभूता या विश्वस्याघौघनाशनी ।
विश्वरूपधरोदेवः प्रीयतामनया गवा ॥

अथ आज्यस्य —

कामधेनोः समुद्भूतं देवानामुत्तमं हविः ।
आयुर्विवर्द्धनं पुंसामाज्यं पातु सदैव माम् ॥

अथाश्वस्य—

विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भव ।
चन्द्रार्कवाहनोनित्यमतः शान्तिं प्रयच्छ मे ॥

अथ गजस्य—

महाशक्तिर्महाकायः पीताम्बरसमप्रभः ।
सर्वसंग्रामजेता च गजोयच्छतु मे सुखम् ॥

अथ दध्नः —

दधि त्वामदतः पुंसः सदा सन्तुष्टिरुत्तमा * ।

---

* पुष्टिरुत्तमा इति बहुषु निबन्धेषु पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतस्तव प्रदानेन इहामुत्रास्तु शं मम ॥

अथ चौरस्य —

अलक्ष्मीं हरते नित्यं सुखसौभाग्यवर्द्धनम् ।
चौरं माङ्गल्यमायुष्यमतः शान्तिं प्रयच्छतु ॥

अथ नवनीतस्य —

कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परम् ।
नवनीतं प्रदास्यामि बलं पुष्टिं च देहि मे ॥

अथ स (श) क्तोः —

प्राजापत्यायतः प्रोक्ताः स (श) क्तवो यज्ञकर्म्मणि ।
तस्मात् सक्तुप्रदानेन प्रीयतां मे प्रजापतिः ॥

अथ सुवर्णतुलस्याः —

सुवर्णतुलसीदानाद्वाङ्मनःकायसञ्चितम् ।
पापं प्रशममायातु सर्वे सन्तु मनोरथाः ॥

अथ पादुकयोः —

कण्टकोत्कटपाषाणवृश्चिकादिनिवारणे ।
पादुके संप्रयच्छामि विप्र प्रीत्यानुगृह्यताम् ॥

अथ गन्धस्य —

श्रीखण्डागुरुकर्पूरकस्तुरी-कुङ्कुमान्वितम् ।
विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

	Rs.	As.
Nyāya[illegible]	3	2
Nityacārapaddhati Fasc. 1-7 (Text) @ /10/ each	4	6
Nityacraāpradiph, Vol. I. Fasc. 1-8, Vol. II, Fāsc. I-3 @ /10/-	6	14
Nyāyabinduṭikā, Fasc 1	0	10
Nyāya Kusumāñjali Prakaraṇa Vol. II, Fasc. 1-3 @ /10/ each	1	14
Nyayasārāh	2	0
Padumawati, Face. 1-5 @ 2/	10	0
Prāk-ta - Paingalam, Fasc. 1-7 @ /10/ each	4	6
Prāk ta Lakṣaṇam. Fasc. 1 @ 1/8/-	1	8
Parācara Smriti. Vol. I. Fasc. 1-8 ; Vol. II, Fasc. 1-5 ; Vol. III, Fasc. 1-6 @ /10/ each	12	8
Parācara. Institutes of (English) @ 1/	1	0
Prabandhacintāmaṇi (English) Fasc. 1-3 @ 1/4/ each	3	12
Rasarnavam. Fasc. 1-3	3	12
Sānkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
Samaraicca Kaha, Fasc. 1-3 @ /10/	1	14
Shaddarsana-Samuccaya, Fasc. 1-2 @ /10/	1	4
Six Buddhist Nyaya Tracts	0	10
Sraddha Kriya Kaumudi, Fasc. 1-6	3	12
Sragdharā Stotra (Sanskrit and Tidetan)	2	0
Sucruta Saṁhitā, (Eng.) Fasc. 1 @ 1/-	1	0
Suddhi Kaumudi. Fasc. 1-4	2	8
Surdaranandam Kavyam	1	0
Suryya Siddhanta, Fasc. I	1	4
Svainika Sastra	1	0
*Taittereya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
* Ditto Brāhman. Fasc. 6-25 @ /10/-	12	8
Tāṇdya Brāhmaṇ. (Text) Fasc. 6-19 @ /10/ each	6	14
Tantra Vārtika (English) Fasc. 1-6 @ 1/4/	7	8
Tattva Cintāmaṇi, Vol. I, Fasc. 1-9 : Vol. II, Fasc. 2-10, ; Vol. III, Fasc. 1-2. Vol. IV, Fasc. 1, Vol. V. Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	24	6
Tattva Cintamani Didhiti Vivriti, Fasc. I, @ /10/ each	0	10
Ditto Prakas. Fasc. 1-3, @ /10/ each	1	[illegible]
Tattvārthādhigama Sutrom. Fasc. 1-3	1	[illegible]
Tirthacintamöni, Fasc. I. @ /10/ each	0	[illegible]
Trikāṇda-Maṇdanom, Fasc. 1-3 @ /10/	1	[illegible]
Tul'si Satsai Fasc. 1-5 @ /10/	[illegible]	[illegible]
*Upamita-bhava-prapañcha-kathā Fasc. 1-2, 5-13 @ /10/ each	[illegible]	[illegible]
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ 1/	6	[illegible]
Vallāla Carita. Fasc. 1	0	10
Varsa K yā Kaumudi, Fasc 1-6 @ /10/	3	12
*Vāyu Purāṇa. Vol. I. Fasc. 3-6 ; Vol. II, Fasc. 1-7 , @ /10/ each	6	14
Vidhāno Pārigāt, Fasc 1-8 : Vol II Fasc 1 @ /10/ Vol. II. 2-4 @ 1-4	9	6
Vivādaratnākara. Fasc. 1-7 @ /10/ each	4	6
Vrhat Sayambhū Purāṇa, Fasc. 1-6	3	12
Yogasāstra, Fasc. 1-3	3	12

Tibetan Series.

	Rs.	As.
Bauddhastotaasāngraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1-4, @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. I	1	0
Pag-Sam Thi Śiñ, Fasc. 1-4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 2-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc. 1-6 @ 1/ each	14	0
Rtogs brjod dpag hkhari Śiñ (*Tib.* & *Sans.* Abadān Kalpalatā,) Vol. I, Fasc. 1-6 ; Vol. II. Fasc. 1-5 @ 1/ each	16	0

Arabic and Persian Series.

	Rs.	As.
Al-Muqaddasi (English) Vol. I, Fasc. 1-3 @ 1/	4	0
Āin-i-Akbari, Fasc. 1-22 @ 1/8/ each	33	2
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/ each	36	0
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/8/	55	8
Ditto (English) I, Fasc. 1-8 ; II, Fasc. 1-7 III, Fāsc I, @ 1/4/	20	0
Arabic Bibliography, by Dr. A. Sprenger	0	10
Catalogue of Arabic Books and Manuscripts 1-2	2	0

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	Rs.	
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each	3	0
Conquest of Syria, Fasc. 1-9 @ /10/	5	10
Dictionary of Arabic Technical Terms & Appendix Fasc 1-21 @ 1/8/- ...	31	8
Fara Nama	1	0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/8/ each ...	21	0
Fihrist-i-Ṭūsī, or Ṭūsy's list of Shy'ah Books Fasc. 1-4 @ 1/ each ...	4	0
History of Gujarat	1	0
Haft Āsmān, History of the Persian Masnawi, Fasc. 1. @ /12/ ...	0	12
History of the Caliphs, (English) Fasc. 1-6 @ 1/4/ each	7	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /10/ each	1	14
Iṣābah, with Supplement, (Text) 51 Fasc. @ 1/ each	51	0
Ma'āsir-i-Rahīmī, Part I, Fasc. I	2	0
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-9; Vol. III. Fasc. 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. II, Fasc. 10-12; Index to Vol. III, Fasc. 11-12; @ 1/- each	35	0
Marhamu'L-Ilali'L-Mu'Dila	1	0
Muntakhabu-t-Tawārikh, Fasc. 1-15 @ /10/ each	9	6
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and 3 Indexes; Vol. III, Fasc. 1 @ 1/ each	15	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each	11	14
Ma'āṣir-i-'Ālamgīrī, Fasc. 1-6 @ /10/ each	3	12
Nukhbatu-l-Fikr, Fasc. 1	0	10
Niẓāmī's -Khiradnāmah-i-Iskandari, Fasc. 1-2 @ /12/ each ...	1	8
Qawaninu's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut.-Col. D. C. Phillott ...	5	0
Riyāẓu-s-Salātīn Fasc. 1-5 @ /10/ each	3	2
Ditto Ditto (English) Fasc. 1-5 @ 1/	5	0
Tadhkira-i-Khushtavīsān	1	0
Tabaqāt-i-Nāṣirī, (English) Fasc. 1-14 @ 1/ each	14	0
Ditto Index	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni Fasc 1-7 @ /10/ each ...	4	6
Tārīkh-i-Fīrūshāhi, of Shams-i-Sirāj Alif, Fasc 1-6 @ /10/ each ...	3	12
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each	3	0
The Mabanī' L Lughat : A Grammar of the Turki Language in Persian	1	8
The Persian and Turki Divans of Bayram Khan, Khan Khanan ...	1	0
...ūzuk-i-Jahāngiri (Eng.) Fasc. I @ 1/-	1	0
...zuk-i-Jahāngirī, (English) Fasc. 1	1	0
...s o Rāmīn, (Text) Fasc. 1-5 @ /10/ each	3	2
...arnāmah, Vol. I, Fasc. 1-9 Vol. II, Fasc. 1-8 @ /10/ each ...	10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. ASIATIC RESEARCHES, Vols. XIX and XX @ 10/ each 20 0
2. PROCEEDINGS of the Asiatic Society from 1870 to 1904 @ /8/ per No.
3. JOURNAL of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7) 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.
   N.B.—The figures enclosed in brackets give the number of Nos. in each Volume.
4. Journal and Proceedings, N. S., 1905, to date, @ 1-8 per No. to members and Rs. 2/ per No. to Non-members.
5. Memoirs 1905 to date. Price varies from No. to No. Discount of 25% to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910. ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts I—III with 8 colored plates, 4to. @ 6/ each 18 0
9. Kacmiracabdāmrta. Parts I and II @ 1/8 ... ... 3 0
10. Persian Translation of Hāji Bābā of Ispāhān, by Hāji Shaikh Ahmad-i-Kirmāsi and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-35 @ 1/ each 35 0
Nepalese Buddhist Sanskrit Literature, by *Dr.* R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer Asiatic Society," only.

BOOKS ARE SUPPLIED BY V.-P.-P.